वर्षम् 72
अङ्कः -10
श्रावणमासः
विक्रमाब्दः 2079
युगाब्दः 5124
अगस्त, 2022

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः १५/-
वार्षिक-शुल्कम्
१५०/-
पञ्चवार्षिकशुल्कम्
७००/-
पञ्चदशवार्षिकशुल्कम्
२१००/-

प्रकाशन प्रत्येक माह की 1 तारीख



राष्ट्राध्यक्षपदे देशेनाऽभिषिक्ता सगौरवम्।
मान्याऽसौ द्रौपदी मुर्मू कुर्याद्राष्ट्रहितं सदा।।

# विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | गजद्वयान्तरालस्याभावः | डॉ.सत्यव्रतवर्मा | ६ |
| ३ | रक्षाबन्धनगीतम् | डॉ. सोहनलालमीना | ७ |
| ४ | गोपाङ्गनावैभवमहाकाव्यम् | डॉ. प्रमोदकुमारशर्मा | ८ |
| ५ | श्रौताग्न्याधानविमर्शः | डॉ.डी.दयानाथः | १२ |
| ६ | कोरोना तु गमिष्यति....... | डॉ. प्रीतिः आर. पुजारा | १९ |
| ७ | तारांकितशंकराष्टकम् | प्रो. ( डॉ. ) ताराशंकरशर्मा 'पाण्डेयः' | २० |
| ८ | तव कथामृतम् | आचार्यः पं.नथमलशास्त्री दाधीचः | २१ |
| ९ | नूतनकाव्यपृषताः | डॉ.हर्षदेवमाधवः | २४ |
| १० | संस्कृतसमाचाराः | प्रबन्धसम्पादकः | २५ |
| ११ | पदप्रहेलिका - २ | मधुसूदनशर्मा ( प्राध्यापकः ) | २६ |
| १२ | पुस्तक-समीक्षा | महामहोपाध्यायदेवर्षिकलानाथशास्त्री | २७ |
| १३ | नारीस्तम्भः | डॉ. राजेश्वरी भट्टः | २९ |
| १४ | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9799011085**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारतीय संस्कृत प्रचार संस्थान'' के नाम से ही भेजें- प्रबन्ध सम्पादक)**

ISSN2249-698X

॥ श्रीशः ॥

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ

स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )

स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः

श्रीश्यामशरणदेवाचार्यः

( निम्बार्कपीठं, सलेमाबादः )

स्वामी रामभद्राचार्यः

( चित्रकूटः )

स्वामी अवधेशानन्दगिरिः

( हरिद्वारम् )

महन्तः गोविन्ददेवगिरिः

( पुणे )

स्वामी राघवाचार्यवेदान्ती

( अग्रपीठं रेवासा )

महन्तः प्रतापपुरी

( तारातरामठं, बाडमेरम् )

श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादकः
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्षः
प्रोफेसर शङ्करप्रसादशुक्लः

उपाध्यक्षौ
डॉ. नाथूलालसुमनः
डॉ. नन्दसिंहनरूका:

सचिवः
डॉ. सुधीरकुमारशर्मा

सहसचिवः
कृष्णाकुमारशर्मा

व्यवस्थापकः
राजीवदाधीचः
9352030291

पत्रिकाप्रकाशनेऽधिगतमार्थिकं सौजन्यं राजस्थान-संस्कृत-अकादमीतः

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाइट : www.bhartipatrika.org

वर्षम् 72 अङ्कः -10
श्रावणमासः
विक्रमाब्दः 2079
युगाब्दः 5124
अगस्त , 2022

एकस्याः प्रतेः 15/-
वार्षिकशुल्कम् 150/-
पञ्चवार्षिकशुल्कम् 700/-
आजीवनसदस्यताशुल्कम् 2100/- ( 15 वर्षाणि )

सम्पादकीयम्

# श्रावणपूर्णिमातिथौ संस्कृतम्पूज्यते जनैः

...✍ प्रोफेसर श्रीकृष्णशर्मा

अखिलस्य जगतः प्राचीनतमायाः संस्कृतभाषायाः समृद्ध्यर्थं विश्वसंस्कृतदिवसः प्रतिवर्षं श्रावणी-पूर्णिमाया तिथौ समायोज्यते। कस्यापि देशस्य वैशिष्ट्यं तदीयभाषया संस्कृत्या च प्रतीयते। भारतीया संस्कृतिः संस्कृतभाषायामेवोपनिबद्धा। अतश्चोक्तं- **'संस्कृतं संस्कृतिश्चैव श्रेयसे समुपास्यताम्'** इति। संस्कृतभाषा न केवलं सम्भाषणे मधुरा परिमार्जिताऽपितु चतुर्वर्गफलप्राप्तौ साक्षादुपयोगिनी। संस्कृतमस्माकं निषेकादिभस्मान्तसंस्कारेष्वनुविद्धम्, यद्विनाऽस्माकं जीवनं निष्प्राणमिवानुभूयते।

आकश्मीरादा कन्याकुमारि संस्कृतभाषायां पूजापद्धतिप्रकारः समान एव। सनातनधर्मावलम्बिनां सर्वाणि नामानि संस्कृतभाषोपनिबद्धानि सन्ति। धर्मस्य शाश्वतं सत्यं लक्षणं यादृशं संस्कृतभाषायां लक्षितं, न तादृशमन्यत्र। तथा हि –

**अहिंसा-सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।**
**एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः।।**
**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।**

**यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः।** इत्यादि।

सदाचरणं सत्कर्म एव धर्म इति निष्कर्षः।

भारतीयसंस्कृतेरादर्शभूता ग्रन्थाः संस्कृतभाषाया-मेवादौ प्रणीतास्तथा हि –

वेदोपनिषदादयः रामायण-महाभारतादयश्च। राजनीतिशास्त्रग्रन्थाः **कौटिलीयमर्थशास्त्रम्**-शुक्रनीतिः-कामन्दकीयनीतिसार इत्यादयः, **मनुस्मृति**-याज्ञवल्क्यस्मृति-प्रभृतयो धर्मशास्त्रग्रन्थाः, **चरकसंहिता** – सुश्रुतसंहिता – रसरत्नाकर – काश्यपसंहिता प्रभृतयश्चिकित्साग्रन्थाः, परमाणुसिद्धान्तस्याद्यग्रन्थो कणाद-ऋषिप्रणीतो **'वैशेषिकसूत्रम्'**, शारीरिक-मानसिक-स्वास्थ्यलाभाय परमानन्दस्वरूपकैवल्याप्राप्तये विश्वस्याप्रतिमनिधि-स्वरूप-अष्टाङ्गयोगप्रतिपादकं **'पातञ्जलं योगदर्शनम्'**, विभिन्नयान्त्रिकविद्यानां प्राचीनतमो ग्रन्थो भरद्वाज ऋषिप्रणीतः **'यन्त्रसर्वस्वम्'** इति, ऊर्जाविज्ञानस्य (विद्युदुपयोगस्य) ग्रन्थोऽगस्त्यऋषिप्रणीतः **'शक्तिसूत्रम्'** इति, विश्वामित्रस्य कलशास्त्रविज्ञानम्, समस्तललित-कलानाम् आकरग्रन्थो 'नाट्यशास्त्रम्' इति, ज्योतिषग्रन्थाः- **वेदाङ्गज्योतिषम्,** आर्यभटीयम्, बृहज्जातकम्, लीलावती, बीजगणितम् इत्यादयः, शिलालेखाः-ताम्रपत्राणि-भोजपत्राणि प्रभृतय ऐतिह्यप्रमाणका ग्रन्थाश्चान्या बह्वी ग्रन्थराशिरादौ संस्कृतभाषायामेवोपनिबद्धाऽऽसीत्। दिङ् मात्रमेतत्।

किं बहुना, अद्यापि प्रचुरमात्रायां संस्कृते सम्भाषणम्, अध्ययनाध्यापनम्, साहित्यसर्जनम्, पत्र-पत्रिकाणां प्रकाशनञ्चानवरतं भवति। **ऋग्वेदः** सर्वतः प्राचीना ऋषिभिर्दृष्टा कृतिर्विश्वस्य जगतो न्यासभूता वैदिकसंस्कृतभाषायामेव। प्रायेण सर्वासां भाषाणां जननी संस्कृतमेव। पाणिनीया **'अष्टाध्यायी'** निखिलेऽपि विश्वे सर्वतोऽप्यधिको वैज्ञानिको व्याकरणग्रन्थः संस्कृतभाषायामेव। अतः संगणकयन्त्रस्य (Computer) उपयोगाय वैज्ञानिकाः संस्कृतमेव अनुकूलतमां भाषां मन्यन्ते। 'कर्णाटक' प्रदेशे 'शिमोगा' मण्डले **'मत्तूर'** ग्रामवासिनो जन्मत एवेमां संस्कृतभाषां मातृभाषारूपेण व्यवहरन्तीति

अस्याः पुराकाल इवाधुनापि लोकभाषात्वमक्षुण्णम्। इत्थं संस्कृतस्य वैशिष्ट्य-परिगणनं दुष्करम्। दिङ्मात्रमेतज्ज्ञेयम्।

संस्कृतस्य पूर्वावस्थामधिगन्तुं भारतसर्वकारेण किञ्च राज्यसर्वकारैः निरपेक्षभावेन संरक्षणं सम्पोषणमावश्यकम्। वर्तमानसर्वकारो नूतनशिक्षानीतौ (NEP) संस्कृतं प्रोन्नयितुं तत्पर इवाभातीति शुभसंकेतः। एतदाकलय्यैव **'विश्वसंस्कृतदिवसः'** समारोहपूर्वकमायोज्यते।

ऐषमः 12 अगस्त, 2022 दिवसेऽयं संस्कृदिवससमारोहः। संस्कृतानुरागि-**डॉ.कर्णसिंहस्य डॉ.सरोजिनीमहिष्याश्च** सत्परामर्शेन श्रीमती इन्दिरागान्धीमहोदयायाः प्रधानमन्त्रित्वकाले, डॉ.त्रिगुणसेनस्य शिक्षामन्त्रित्वकाले 1968 तम ईशवीयाब्दे 'प्रतिवर्षं संस्कृदिवसः समाचरितव्यः' इति प्रस्तावः समागतः।

कदाऽयं संस्कृदिवसः समायोजनीय इति विचारणायां संस्कृतविद्वद्भिः **'श्रावणी पूर्णिमा'** समीचीनेति विचारणा प्रस्तुता। युक्तिश्चात्र प्रदत्ता यदस्मिन् दिवसे **'उपाकर्म'** अर्थात् वेदाध्ययनम् प्रारभ्यते। वेदाध्ययनमेव 'अध्यायः' 'स्वाध्यायः' वाऽभिधीयते।'उपाकर्म' इत्यस्य साक्षादर्थः 'उपक्रम' इति। अतः स्वाध्यायस्य (वेदस्य) **उपक्रमः=प्रारम्भो** यस्मिन् (श्रावणी-पौर्णमासी) दिवसे क्रियते, स एवो-पाकर्मदिवसः, स एव च संस्कृतदिवसो भवितुमर्ह इति। तदानीं शिक्षासत्त्रस्यारम्भदिवसे शास्त्रविधि-माश्रित्य समायोजितोत्सव 'उपाकर्म' नाम्ना व्यवहृत आसीत्। मनुनाप्युक्तम् -

**श्रावण्यां प्रौष्ठपद्यां वाऽप्युपाकृत्य यथाविधि। युक्तश्छन्दांस्यधीयीते**'ति (मनुस्मृतिः, ४.९५)। इत्थं **डॉ.वी.के.आर.वी.राव** महोदयस्य केन्द्रीयशिक्षा-मन्त्रित्वकाले 1969 तम ईशवीयाब्दस्य श्रावण-पूर्णिमायां प्रथमः 'संस्कृत-दिवस-समारोहः' समायोजित आसीत्। अधुनापि प्रतीकात्मकरूपेण पाठशालासु **प्रवेशोत्सवः** समायोज्यते।

सम्पूर्णभारतवर्षे संस्कृतविश्वविद्यालयैः, आधुनिकविश्वविद्यालयीयसंस्कृतविभागैः, अन्याभिश्च संस्कृतसंस्थाभिः, राजस्थानसर्वकारस्य प्राशस्त्ये-नायमुत्सवः 12 अगस्त, 2022 दिनांके समायोजयिष्यते। केन्द्रसर्वकारस्य निर्देशानुसारं सर्वैरेव राज्यसर्वकारैरयं समारोहः स्वतन्त्रतायाः 75तमेवर्षेऽमृतमहोत्सवावसरे महता समुल्लासेन समायोजयिष्यते इति हर्षप्रकर्षः। समेषामभिनन्दनम्।

**प्रथम-आदिवासि-महिला-राष्ट्रपतिः**

श्रीमती **द्रौपदी मुर्मू**-महोदया, अनुसूचित-जनजातिवर्गे लब्धजनिः, विशाल-भारतवर्ष-देशस्य प्रथमा आदिवासि-महिला-राष्ट्रपतिः सञ्जातेति हर्षप्रकर्षः। **राजग**समर्थिता महामहिम-राष्ट्रपति-प्रत्याशिनी द्रौपदी मुर्मूः संयुक्तविपक्षसमर्थित-प्रत्याशिनं सिन्होपाह्व-यशवन्तं 947 (2, 96, 626 मूल्यांकितैः) मतैः पराजितवती। एषा 2824 (64.3%) मतानि प्राप्तवती, अथ च विपक्ष-प्रत्याशी 1877 (35.97%) मतानि प्राप्तवान्। स्वतन्त्रताया अमृतमहोत्सवावसरे सर्वप्रथम-आदिवासी-महिलारूपेण भारतदेशस्य सर्वोच्चगौरवशालि-महामहिमपदमधिष्ठितवत्यै द्रौपदी मुर्मू-महोदयायै कोटिशो वर्धापनानि अभिनन्दनानि च।


**- सम्पादकः**

**आचार्योऽध्यक्षचरश्च, संस्कृतविभागः,**

**जयनारायणव्यासविश्वविद्यालयः,**

**जोधपुरम् (राजस्थानम्)**

**दूरभाषाङ्काः 8386943655**

# गजद्वयान्तरालस्याभावः

( मूललेखकः - सूर्यकुमारपाण्डेयः )

❑ अनुवादकः -डॉ.सत्यव्रतवर्मा
राष्ट्रपतिसम्मानितः

अश्वत्थाम्नो जनको द्रोणाचार्यः कांश्चन दिवसान् आतुर आस। सोऽकस्मात् कोरोनारोगेण बलवदाक्रान्तः। तदाऽश्वत्थामा हस्तिनापुरे नाभूत्। प्रवर्तमाने संक्रमणे कोऽप्याचार्यमुपैतुं नोदसहत। आचार्यत्वकाले गुरुर्द्रोणो बहून् छात्रान् शस्त्रविद्यायामपि विनीतवान्। परमिदानीं नूतना वा पुरातना वा सर्वे शिष्या दूरेऽवातिष्ठन्त तत्रस्था एव चात्मनो हितममन्यन्त। तेन साभिनिवेशं विनीतौ भीमार्जुनौ श्लाघ्यं पीएच.डी. उपाधिमप्यविन्दताम्, परं गुरुदेवः कोरोनापरीतो जात इति निशम्य तौ स्वीयं चलदूरभाषमपि तूष्णीकं विधाय कस्मिंश्चिदज्ञातपूर्वे देशे वसतिं चक्रतुः। द्रोणो विपत्काले स्वशिष्यान् भूयसाऽस्मरत्।

यदा स एकलव्यमस्मरत् तस्य रोषोऽपि गुरुवर्य्यस्य स्मृतिपथमगात्। स मनागपि न व्यस्मार्षीद् यदहं 'तम् ऑनलाइनविधिना शिक्षमाणोऽपि नियताध्यापनस्य शुल्कमयाचे। तद् दातुमपारयतश्च श्वेतपत्रे तस्याङ्गुष्ठांकनम् अकारये।' तेषु विषमेषु दिवसेषु तस्य प्रियः शिष्यो दुर्योधनोऽपि तं कुशलं प्रष्टुं नायातः। यद्यपि स तस्मिन्नपात्रेऽपि सुतराम् अस्निह्यत्, स्वर्णपदकेन च तम् अभूषयत्। दुर्योधनो नितरां वेद यद् गुरुवर्य्यः शय्यारूढोऽस्ति। इदानीं द्रोण आत्मनो द्वितीय आसीत्। एकाकी सन् स सर्वान् शिष्यान् मनोहत्य धिक्करोति स्म। तदर्थं दुग्धमानेतुमपि तत्र कश्चिन्नाविद्यत। निर्विण्णः स हरिद्राचूर्णयुतं समितासाधितं द्रवं (घोल इति भाषायाम्) निपीयैव सन्तोषमभजत्।

आचार्यस्याऽऽमयवृत्तं युधिष्ठिरस्यापि कर्णयोर्न्यपतत्। सोऽपि द्रोणाचार्यस्य शिष्योऽभूत् परं दुर्योधने तस्य पक्षपातात् तं प्रति कोपं दधार। सोऽचिन्तयद् यदस्मिन् विषमकाले आचार्यस्य ज्ञानदर्पोऽपाकर्तुं शक्यते। स 'पीपीइकिट' इत्याख्यम् अदृष्टपूर्वं परिधानकल्पं किञ्चिद् दधानो गुरुगृहमयासीत्। दैत्याकारसंकाशं तं विलोक्य गुरोर्मनसि भयं पदमकरोत्, परं कश्चिन् मामिह संकटकाले द्रष्टुमागत इति विचिन्त्य स प्रासीदत्। मच्छिष्या मां नियमेन प्रणिपतेयुरित्यभूत्तस्य कठोरं शासनम्। यस्तस्मात् प्रामाद्यत् तं तत्करणार्थं स प्रसभं प्रैररत् युधिष्ठिरो दूरादेवाञ्जलिं बद्ध्वाऽवादीत् - क्षमस्व, गुरुवर! अस्मिन् महामारीकाले भवच्चरणस्पर्शो मेऽनर्थाय स्यात्। न तद् द्रोणायारोचत तथापि मां द्रष्टुमद्यत्वे कोऽपि नायाति, परं युधिष्ठिर आयात इति विचार्य सोऽहृष्यत्।

युधिष्ठिरः प्राह - भवान् ज्ञानशेवधिरस्ति इति विदितं लोकस्य परं भवद्भिर् मास्कमपरिहरणीयं 'गजद्वयान्तरालं च पालनीयम्' इति सद्यःप्रवर्तितो नियमोऽतिक्रान्तः। द्रोणाचार्यस्याननं तदा मास्केनावृतमासीत्। मास्कान्तरितमुखः स

सरोषमब्रवीत् – त्वं प्रेक्षसे यन्मया मास्कं धृतं तदपि त्वमनर्गलं वदसि। कथंकारं त्वमेतं बालिश्यपूर्णं प्रश्नं प्रष्टुं साहसमकार्षीत्! स युधिष्ठिरं ततो बहिष्कर्तुमवाञ्छत् परमस्मिन्निर्गते कोप्यन्योऽत्र नायास्यतीति विचार्य तूष्णीं स्थितः।

आचार्यवर्य्यं तूष्णीकं वीक्ष्य युधिष्ठिरोऽगादीत् – श्रीमन्! अर्धोक्तमिदम्। भवता मास्कं नूनमामुक्तं। धृतं किन्तु 'गज'द्वयान्तरालनियमो न पालितः। अहं सर्वेभ्यो गजद्वयं दूरमवातिष्ठे, द्रोणः सरोषमब्रवीत्। युधिष्ठिर एतमेवावसरं प्रतीक्षते स्म। सोऽभाणीत् कियत्फुटप्रमाणं गजं भवति, गुरुवर! किं वक्षि, किं तव मे ज्ञानेऽविश्वासोऽस्ति? अपि ते शिरो भ्रमति? 'त्रिफुटप्रमाणं गजं भवतीति प्रत्यक्षं समेषाम्'। इदं निशम्य युधिष्ठिरः सहासमाह – 'यत्स्खलितं भवद्भिर्द्वापरेऽकारि तस्यैवावृत्तिरद्य पुनर्व्यधायि'। द्वापरे भवान् नरकुञ्जरयोर्भेदकं ज्ञातुं न प्राभवत्, अद्य च 'गज-गजयोर्विशेषं न वेद'।

एतच्छ्रुत्वा द्रोणाचार्यः क्रोधाध्मातो जातः। स सम्भ्रमेणागादीत्- त्वं मां किं बोधयितुमीहसे? त्वं मामज्ञं मन्यसे? आचार्यवर! कदापि न। कथमहं तत्कर्तुमलम्? परं गुरुवर्य्य! गजस्यैकोऽर्थो हस्ती भवतीति भवान् नूनं जानीते। तेन गजद्वयान्तरालस्य तात्पर्योऽस्ति करिद्वयान्तरालम्। स च भवद्भिर्नविदि न चाग्राहि। तदाकर्ण्य द्रोणाचार्यो भृशम् अत्रपत (=अलज्जत)। स तथा ह्रीणोऽभूद् यत्तस्य संज्ञापि लुप्ता। युधिष्ठिरो मुखारविन्दे विजयश्रियं दधान एतं वृत्तान्तम् अश्वत्थाम्नि प्रेषयितुं चलदूरभाषं साधयितुं प्रवृत्तः।

**७/३४, पुरानी आबादी, नामदेव फ्लोर मिल के पास, श्रीगंगानगर-३३५००१**

---

# रक्षाबन्धनगीतम्

❑ डॉ. सोहनलालमीना

**प्रतिश्रावणं आगच्छति रक्षाबन्धनम्,**
**स्वभगिन्याः परिचयं करोति रक्षाबन्धनम्,**
**नक्षत्रेभ्यः चन्द्रो दीप्ततरः,**
**भावयति स्नेहं रक्षाबन्धनम्,**
**यो विस्मृत्यापि न विस्मरति,**
**सुखदान् क्षणान् आनयति रक्षाबन्धनम्।**

**अखण्डप्रेमभावः सूत्रेण,**
**गृहे गृहे प्रसृतः रक्षाबन्धनम्,**
**सर्वलोकस्य बहुमूल्यम्,**
**वस्तुभ्यः प्रियतरं रक्षाबन्धनम्,**
**सर्वदा भगिनीं रक्षेति,**
**वदति भ्रातरं रक्षाबन्धनम्।।**

– प्राध्यापकः, राजकीय-वरिष्ठोपाध्याय-संस्कृत
विद्यालयः रटलाई-झालावाड़ (राज.)
मो. 9928626224

# गोपाङ्गनावैभवमहाकाव्यम्

## ( अथ पंचमसर्गः )

❑ डॉ. प्रमोदकुमारशर्मा

अस्त्युत्तरस्यां दिशि भारतात्मा
व्रजप्रदेशो भुवि राजमानः।
अस्यैव कालिन्दजलं स्पृशन्ती
सुराजधानी मथुराभिधेया।।१।।

अस्यां हि राधाप्रियकृष्णचन्द्रो
व्रजं स्मरन् गोकुलमात्मनस्तम्।
हर्म्यस्य रम्ये रहसि प्रकोष्ठे
विराजते गोपसखो व्रजेशः।।२।।

नेत्रारविन्दे च निमील्य कृष्णः
तदेव वृन्दावनमात्मसंस्थम्।
रासस्थलं तद् रमणीयकुञ्जं
स्वदिव्यदृष्ट्यात्मनि संददर्श।।३।।

तत्रोद्धवप्रेषितमित्रवर्यं
स्थितं निकुञ्जाद् बहिरालपन्तम्।
तामेव राधाञ्च सखीस्तथा ताः
विलोक्य कृष्णश्चकितो बभूव।।४।।

गोपाङ्गनावैभवमात्मरुच्या
विशुद्धभावामृतभक्तिरूपम्।
वेदाङ्गजज्ञानसमुद्ररूपं
श्रुतं तथा चोद्धवमात्ममित्रम्।।५।।

पक्षं विपक्षं ह्युभयोस्समग्रं
सयुक्तिकं संश्रवणादपूर्वः।
ज्ञानस्य भक्तेश्च समागमोऽयं
हरेस्तदानीं हृदये बभूव।।६।।

ज्ञानञ्च भक्तिं हृदये विलोक्य
द्विधा विभक्तञ्जगदीश्वरस्य।
कृष्णस्य संसारनियन्त्रकस्य
स्वयं समग्रं हृदयं तदाहो।।७।।

प्रश्नोत्तराभ्याञ्च विचारणाभ्यां
निगूहनात् कृष्णमनस्तदैव।
सर्वेश्वरश्रीवसुदेवसूनोः
विना विलम्बं हृदयं ममन्थ।।८।।

स्वस्यात्मनश्श्याममनोहरोऽसा-
विमामवस्थां हि निरीक्ष्य कृष्णः।
एकाग्रतायां गहनं गभीरं
स्वयं तदाचिन्तयदात्मबुद्ध्या।।९।।

भक्तिर्मदीया मम साधुभक्तान्
मदीयलोकाभिमुखीकरोति।
ज्ञानम्मदीयम्मम विज्ञभक्तान्
समांश्च माम्प्रापयति प्रकृष्टम्।।१०।।

अन्वेषयन्ती जननी तदानीं
व्रजप्रियं तं व्रजराजकृष्णम्।
कृष्णो न जाने क्व गतस्सुतो मे
समाभवद्भोजनकाल एषः।।११।।

ज्ञानञ्च भक्तिं बहु चिन्तयन्तं
समाधिलग्नं रहसि स्थितं तम्।
दृष्ट्वावदत्तत्क्षणमेव माता
वद क्व मग्नः किमिदं करोषि।।१२।।

मातामहस्ते नृप उग्रसेनः
प्रतीक्षते त्वाञ्जल भोजनार्थम्।
जातो विलम्बस्त्यज योगनिद्राम्
अये !हरे !तै क्व गता बुभुक्षा।।१३।।

कस्य स्मृतौ त्वञ्च चिरान्निमग्नः
किमत्र जातं हृदये त्वदीये।
नेत्रारविन्दे पिहिते कथं ते
हरे! समायाहि सुभोजनार्थम्।।१४।।

जानामि सर्वं हृदये त्वदीये
व्रजेश्वरी तिष्ठति सैव राधा।
एकक्षणं याति न ते विना तां
सदैव तस्यास्स्मरणं करोषि।।१५।।

श्रुत्वैव राधेतिवचो जनन्याः
सुचक्षुषी ते पिहिते सुरम्ये।
उद्घाटिते पंकजतुल्यशोभे
बभूवतुस्तस्य हरेर्मुरारेः।।१६।।

दृष्ट्वा समीपन्निजमातरं तां
विनीतकृष्णःकरपंकजाभ्याम्।
उत्थाय शीघ्रञ्चरणौ निपत्य
स्मितानना सादरमाननाम।।१७।।

विस्मृत्य सर्वं जननी तदानीं
निजात्मजं तं परमात्मकृष्णम्।
उत्थाप्य चाश्लिष्य पुनस्सहर्षं
प्रभोर्हि चन्द्राननमाचुचुम्ब।।१८।।

स्वादिष्टपक्वान्नमयं सुभोज्यं
स्वनिर्मितं भोजयितुं स्ववत्सम्।
हस्तेन हस्तम्परिगृह्य माता
स्वकृष्णमानीय ततो जगाम।।१९।।

मात्रा सह श्यामलकान्तियुक्तः
सुपीतवस्त्रावृतकृष्णचन्द्रः।
विद्युत्प्रकाशोज्ज्वलमेघवर्णः
प्रतीयते नीलमणिःप्रयाति।।२०।।

आयान्तमीशं नृप उग्रसेनः
दृष्ट्वा च पुत्रीं वसुदेवपत्नीम्।
अक्रूरसाकं वसुदेवसाकं
तयोःकृते स्वागतशब्दमाह।।२१।।

अक्रूरसाकञ्जनकम्प्रणम्य
प्रणम्य मातामहमुग्रसेनम्।
चर्चानिमग्नौ बलरामकृष्णौ
बभूवतुस्तौ वसुदेववत्सौ।।२२।।

सुस्वादु मिष्टं च सुगन्धितं तद्
ह्यनुष्णशीतं स्पृहणीयभोज्यम्।
सानन्दमास्वाद्य समेऽपि सार्धं
मनोऽनुकूलं चखदुस्तदानीम्।।२३।।

सम्पाद्य माता सुभुजिक्रियां तां
व्रजेशवार्तां वसुदेवमाह।
कृष्णोऽयमस्माकमतीव सार्धां
स्मरत्यहो किं करवाणि नाथ!।।२४।।

स्मृत्वा स्वकीयां व्रजरासलीलां
सखीस्तथा ताम्मुरलीम्मनोज्ञाम्।
गोपांश्च तां गोकुलबाललीलां
समाधिमग्नो भवति व्रजेशः।।२५।।

श्रुत्वा मुखात्तां निजधर्मपत्न्याः
मनोहरां कृष्णचरित्रवार्तां।
प्रौढस्तथा बालमनोविनोदी
स्मिताननः कृष्णपिता बभाषे।।२६।।

बाल्ये हि काले हृदयं पवित्रं
सुनिर्मलं चापि मनो विशुद्धम्।
स्वच्छा नवा कोमलचित्तवृत्ति-
र्भवत्यवश्यं परितो वटूनाम्।।२७।।

खेलन्ति नृत्यन्ति हसन्ति चैषां
स्थिरा मतिर्नो भवति प्रबुद्धा ।
चिन्ता न कार्या खलु बालकानां
भवन्ति चैवादृश एव बालाः ।।२८ ।।

नायं व्रजेशो वटुरस्ति नाथ!
प्रभूतभूभारहरो मुरारिः ।
कंसस्य हन्तारममुं किशोरं
कथम्भवन्तः प्रवदन्ति बालम् ।।२९ ।।

गोवर्धनो येन कनिष्ठिकायां
धृतस्तथेन्द्रोऽपि तिरस्कृतस्सः ।
नैवास्ति बालोऽपितु गोपिकेशो
युवा किशोरः प्रतिभाति नाथ! ।।३० ।।

धीरो नवो वीरयुवा किशोरो
विशालभालस्सुविशालनेत्रः ।
कृष्णोऽस्मदीयस्सुविशालबाहु-
र्विशालवक्षास्सुविवाहयोग्यः ।।३१ ।।

अन्विष्य काञ्चिच्छुभराजकन्यां
विवाहयोग्यां ललनां किशोरीम् ।
कृष्णस्य कुर्वन्ति कथं न शीघ्रं
मनोरमम्माङ्गलिकं विवाहम् ।।३२ ।।

तां सुन्दरीम्प्राप्य वधूम्मनोज्ञां
विवाहिताङ्गीवितरागमूर्तिम् ।
श्रीकृष्णचन्द्रोऽभिनवां किशोरीं
सहैव नीत्वा स्वयमेव रन्ता ।।३३ ।।

तस्यै स्वपत्न्यै पतिकृष्णचन्द्रः
स्वकायसंस्पर्शसुखम्प्रदाय ।
मोदिष्यते सापि वधूर्नवोढा
व्रजेशसंस्पर्शसुखेन नूनम् ।।३४ ।।

एतेन कृष्णस्य मनोऽनुरागो
व्रजं सुविस्मृत्य तथा च राधाम् ।
एधिष्यते पूर्णतयात्र नूनं
स्वभार्यया साकमनन्यगत्या ।।३५ ।।

श्रीकृष्णचन्द्रस्य हरेःप्रकामं
विवाहकार्यक्रममावदन्तीम् ।
तां देवकीवाचमतीव मृद्वीं
पिता सुशृण्वन् मुमुदे मुरारेः ।।३६ ।।

विश्रान्तिकक्षे मनसा तदानीं
समागताम्भोजनजन्यतन्द्राम् ।
ज्ञात्वा स्वदेहे वसुदेवदेवः
निद्रां सुषुप्सुस्सघनामवाप ।।३७ ।।

नेत्रे पिधायाशु पतिं सुषुप्तं
विलोक्य माता मधुसूदनस्य ।
तत्रैव पार्श्वे रमणीयकक्षे
विभाव्य तन्द्रां गहनां सुशिश्ये ।।३८ ।।

निद्रानिमग्नौ पितरौ स्वकक्षे
मनोहरं स्वप्नमतीव रम्यम् ।
तौ दृष्टवन्तौ वनमालिनस्तं
शुभं विवाहस्य हरेर्मुरारेः ।।३९ ।।

विभिन्नपुष्पैश्च सुवल्लरीभिः
सुमण्डितो भाति सुसज्जितश्च ।।
प्रासादमध्यस्थितराजभूमौ
विवाहकार्यक्रममण्डपोऽयम् ।।४० ।।

एकत्र काचिन्नृपराजकन्या
करस्थपुष्पैर्यदुनन्दनस्य ।
सुस्वागतं कर्तुमहो किशोरी
सुशोभते साकमियं सखीभिः ।।४१ ।।

श्रीकृष्णचन्द्रोऽप्यपरत्र मित्रैः
सुसज्जितस्सार्धमहो किशोरः।
संदृश्यते सुन्दरमाधुरोऽसौ
नृपस्य कन्या परिणेतुमुत्कः।।४२।।

केयं सुकन्या ननु कस्य पुत्री
मदीयपुत्रम्परिणेतुमुत्का।
स्वप्ने स्वकीयां वसुदेववर्यः
पपृच्छ पत्नीं किमिदं विचित्रम्।।४३।।

नूनं विशिष्टा बहुसुन्दरी सा
व्रजेशकृष्णम्परिणेतुमत्र।
मन्ये सुपुत्री मगधस्य राज्ञः
स्वतन्त्रभावेन समागतेयम्।।४४।।

कामादिसम्पीडितचित्तवृत्तिश्-
श्याली हि कंसस्य मनोरमेयम्।
पीनस्तनी चारुतमा विशाला
प्रतीयते सा मदनातुरा माम्।।४५।।

निर्लज्जया स्नेहविहीनदृष्टिं
वधूरियं मे मधुसूदनस्य।
तामासुरीं शूर्पणखेव वृत्तिं
कथं समाश्रित्य करोति दुष्टाम्।।४६।।

त्रायस्व शम्भो! मम वत्सकृष्णं
विचिन्तयन्ती वसुदेवपत्नी।
अव्यक्तवाचा हि मुखं तदानीं
स्वकीयमुच्चैर्बहुधा ननाद।।४७।।

श्रुत्वोच्चवाचं व्रजराजमातुः
पिता व्रजेशस्य बुधश्शयानः।
तत्याज निद्रां सघनां मनस्वी
विहाय तन्द्रां वसुदेवदेवः।।४८।।

दृष्ट्वा नदन्तीं प्रियवल्लभां तां
तदा शयानाम्भयभीतभार्याम्।
पपृच्छ संजातमिदं प्रिये! किं
वद त्वया किं हृदयेऽनुभूतम्।४९।।

किञ्चित्क्षणानन्तरमेव नेत्रे
पतिं समुद्घाट्य ददर्श पत्नीः।
सा राजकन्या क्व गता क्व कृष्णः
ततोऽतिवेगेन वचस्तमाह।।५०।।

स्वप्नोऽयमासीन्न तु सत्यमेतन्
न कृष्णमाया न च देवमाया।
आयाहि मा चिन्तय तत्र यावः
प्रियोऽस्ति नौ यत्र शुभाङ्गि! कृष्णः।।५१।।

अन्वेषयन्तौ व्रजगोपिकानां
प्रियं व्रजेशं हृदयेश्वरं तम्।
तौ दम्पती द्रष्टुमितस्स्वपुत्रं
गतौ स्वशङ्कादिनिवारणार्थम्।।५२।।

श्रीराधिकाप्रेमनिमग्नकृष्णं
मुहुर्मुहुस्तौ त्वरया स्मरन्तौ।
गोपाङ्गनानां स्मरणे निलीनं
ह्यपश्यतां कृष्णमहो मुरारिम्।।५३।।

प्रिये! पुत्रोऽस्मदीयोऽयं श्रीराधास्नेहसागरे।
योगेश्वरोऽत्र गोपेशो निमग्नो दृश्यते ध्रुवम्।।५४।।

***********

**इति गोपाङ्गनावैभवमहाकाव्यस्य**
**पञ्चमस्सर्गःपूर्णतां याति।**

**सह-आचार्यः**
**संस्कृतमेवं प्राच्यविद्याध्ययनसंस्थानम्**
**जवाहरलालनेहरुविश्वविद्यालयः, नवदेहली-67**

# श्रौताग्न्याधानविमर्शः

❑ डॉ.डी.दयानाथः

**उपोद्घातः -**

**'यज्ञे सर्वं प्रतिष्ठितं तस्माद्यज्ञं परमं वदन्ति'** इति[1] हि श्रुतिवचनम्। मोक्षसाधनेषु परमोत्कृष्टसाधनं किमिति आरुणिनामकः ऋषिः पितरं प्रजापतिमपृच्छत्। स प्रजापतिनामकः ऋषिः द्वादश मोक्षसाधनानि महर्षीणां मतानुसारेण समुपस्थापितवान्। तेषु यज्ञः मोक्षाय उत्तमं साधनमित्यब्रवीत्। यज्ञो हि देवानां प्रियः। पूर्वानुष्ठितयज्ञफलेनैव देवाः नाकङ्गताः। अपि च यज्ञमनुष्ठायैव देवाः तदा तदा असुरान् पराजितवन्तः। तच्च स्मारितं दर्शपूर्णमासप्रकरणे[2] 'पुरा क्रूरस्य विसृपो विरप्शिन्'इत्यादिस्थलेषु।

वेदविहितयागानामनुष्ठानं समाजहितसाधने नितरामुपकरोतीति न संशीतिः। वेदविहितकर्मणामननुष्ठानेन मनुष्याः पतिताः भवन्तीत्यृषिवचनम्। तदुक्तं स्मृतावपि -

**विहितस्याननुष्ठान्निन्दितस्य च सेवनात्।**
**अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति।।इति।**[3]

वेदाध्ययनं वेदार्थाधिगमनञ्च अनुष्ठाने पर्यवस्यतीति सिद्धान्तः। मीमांसायां धर्मत्वेन यागादीनामेव ग्रहणम्। वेदविहितः धर्मः याग एव भवति। तच्च अर्थसङ्ग्रहे लौगाक्षिभास्करेणोक्तं - 'यागादिरेव धर्मः' इति[4]। श्रुतावपि यज्ञस्य श्रेष्ठत्वं श्रूयते - 'यज्ञो हि श्रेष्ठतमं कर्म' इति[5]। यागः इहलोकस्य परलोकस्य च मध्ये सम्बन्धं स्थापयति। मनुष्यकृतेन यागेन भूलोकः देवलोकश्च उपकृतो भवति। यागेन सन्तुष्टा देवाः भृशं वर्षन्ति तेन भूलोकः नितरामुपकृतो जायते। तदुक्तं महाकविकालिदासेन -

**दुदोह गां स यज्ञाय सस्याय मघवा दिवम्।**
**सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम्।।इति।**[6]

श्रौताग्निसाध्याः बहवः यज्ञाः सन्ति। तेषु सप्त हविर्यज्ञाः सप्त सोमयज्ञाश्च भवन्ति। ते यथा -

| सप्त हविर्यज्ञाः | सप्त सोमयज्ञाः/संस्थाः |
|---|---|
| 1. अग्निहोत्रम् | 1. अग्निष्टोमः |
| 2. दर्शपूर्णमासः | 2. अत्यग्निष्टोमः |
| 3. आग्रयणः | 3. उक्थ्यः |
| 4. चातुर्मास्यः | 4. षोडशी |
| 5. निरूढपशुबन्धः | 5. वाजपेयः |
| 6. सौत्रामणिः | 6. अतिरात्रः |
| 7. पिण्डपितृयज्ञः | 7. अप्तोर्यामः |

इमे सर्वेऽपि यज्ञाः श्रौताग्निसाध्याः भवन्ति। श्रौताग्निश्च आधानकर्मणा सिध्यति। आधानपवमानाभ्यामग्निसिद्धिरिति न्यायात्। अस्यानुष्ठानं श्रौतोक्तविधानेन कर्तव्यं भवति। श्रौतयागं चिकीर्षतः प्रथमकर्तव्यमग्न्याधानं भवति। तदत्र विमृश्यते।

**अग्न्याधानम् -**

अग्न्याधानं नाम अग्नीनामाधानं स्थापनमेव। अनेन कर्मणा गार्हपत्यः, आहवनीयः, दक्षिणाग्निरिति त्रयाणामग्नीनां सभ्यावसथ्यश्चेति पञ्चानां वा अग्नीनां स्वश्रौतसूत्रोक्त-

1. महा.ना.उप. 1.63
2. मा.सं. 1.28
3. या.स्मृ.व्य. 219
4. अर्थसङ्ग्रहे धर्मलक्षणम्
5. तै.ब्रा. 3.2.1
6. रघुवंशम् 1.26

विधिना तत्तदायतनेषु स्थापनं क्रियते। अग्निहोत्रदर्शपूर्णमासाग्निष्टोमादिश्रुतिविहितानां यागहोमादीनामनुष्ठानं विधिवत्स्थापितेषु एतेष्वग्नित्रयेष्वेव भवति। अग्निराधेयो यस्मिन् कर्मणीति बहुव्रीहित्वात्, अग्न्याधेयमिति भावे यः इति बाहुलकाद्वा इदमेव कर्म अग्न्याधेयमित्यपि उच्यते। आपस्तम्बमहर्षिणा अपि – '**अग्न्याधेयं व्याख्यास्यामः**' इति[7] निगदितम्। अग्न्याधानम्, आधानमित्यादिनाम्नाऽपि व्यवह्रियते। इदमाधानं त्रिविधं भवति – सोमपूर्वकमाधानम्, इष्टिपूर्वकमाधानं, होमपूर्वकमाधानञ्चेति। इदं कर्म त्रिषु दिनेषु सम्पद्यते। प्रथमेऽहनि पूर्वकूष्माण्डहोमादिप्रतिसरबन्धनं क्रियते। द्वितीयेऽहनि अग्निसमारोपादिकं कर्म क्रियते। द्वितीयमहः उपवसथमहः इति कथ्यते। तृतीयेऽहनि उत्तरकूष्माण्डं कर्म, आयतनोपलेखनादिकर्म अनुष्ठीयन्ते। सर्वमेतत् स्वशाखासम्बद्धश्रौतसूत्रोक्तविधिनानुष्ठेयम्।

इदं कर्म त्रैवर्णिकेन उपनीतेन कृतदारेण कर्तव्यमिति। आदौ अग्निहोत्रानुष्ठानचिकीर्षया यदाधानं करोति तद्धोमपूर्वकमाधानमित्युच्यते। दर्शपूर्णमासेष्ट्यारम्भात् पूर्वं यदाधानं क्रियते तदिष्टिपूर्वकमाधानमित्युच्यते। सोमयागारम्भात्पूर्वं यदाधानं क्रियते तत्सोमपूर्वकमाधानमित्युच्यते। इदमाधानं कृत्तिकानक्षत्रयुते रोहिणीनक्षत्रयुते वाऽहनि कर्तव्यमिति विधिः।

**अग्न्याधानर्तुविधानम् –**

तैत्तिरीयब्राह्मणे प्रथमाष्टके प्रथमप्रश्ने अग्न्याधानविधिः विस्तरेण निरूपितः वर्तते। ब्राह्मणानामग्न्याधानकालः वसन्तर्तौ ग्रीष्मे क्षत्रियाणां शरदि वैश्यानामिति विधिः। तदुक्तं –

**वसन्ता ब्राह्मणोऽग्निमादधीत। वसन्तो वै ब्राह्मणस्यर्तुः। स्व एवैनमृतावाधाय। ब्रह्मवर्चसी भवति। मुखं वा एतदृतूनाम्। यद्वसन्तः। । यो वसन्ताग्निमाधत्ते। मुख्य एव भवति। इति।**[8]

वसन्तः ऋतुषु मुख्यः भवति। अतः ब्राह्मणः वसन्ते अग्नीनादध्यात्। अत्र वसन्तर्तौः ब्राह्मणस्य प्रधानसाम्याद्वसन्ते अग्नीनादधीत इति विहितम्। वसन्तस्य प्राथम्यं 'मधुश्च माधवश्च वासन्तिकावृतू'[9] इत्यादिश्रुतिवचनादवगन्तव्यम्। अत्र – 'मधुश्चैत्रो मासः माधवो वैशाखः' इति[10] महीधराचार्यः। अपि च तैत्तिरीयसंहिताभाष्ये 'मधुश्चैत्रो मासः माधवो वैशाखमासः। तावुभौ वसन्तसम्बन्धिनावृत्त्ववयवौ' इति[11] सायणाचार्यः। अतो वसन्तस्य प्राथम्यं सिद्धम्। ब्राह्मणस्य प्राथम्यन्तु 'ब्राह्मणोऽस्य मुखमासीत्[12]' इत्यादिवाक्यादवगन्तव्यम्। वसन्ते अग्निमादधानस्य ब्राह्मणस्य स्वोचितं फलं ब्रह्मवर्चसमेव। तथैव –

**ग्रीष्मे राजन्य आदधीत। ग्रीष्मो वै राजन्यस्यर्तुः। स्व एवैनमृतावाधाय। इन्द्रियावी भवति। शरदि वैश्य आदधीत।**
**शरद्वै वैश्यस्यर्तुः। स्व एवैनमृतावाधाय।**
**पशुमान्भवति।** इति[13] श्रूयते।
अन्येषां वर्णानामपि अग्न्याधानकालः तत्फलं च निगदितो वर्तते।

**अग्न्याधानकाले नक्षत्राणां विधानम्**

– कृत्तिकानक्षत्रे गुणदोषप्रदर्शनम् –

वसन्तादिष्वृतुष्वाधानं प्रोक्तम्। अथ अग्न्याधानकाले नक्षत्रविशेषाः अपि विहिताः सन्ति। तच्च तैत्तिरीयब्राह्मणस्य अग्न्याधानप्रकरणे समाम्नातम्। यथा –

7. आ.श्रौ.सू. 5.1.1
8. तै.ब्रा. 1.1.2
9. तै.सं. 4.4.11, मा.सं. 13.26
10. मा.सं.म.भा. 13.26
11. तै.सं.सा.भा. 4.4.11
12. तै.आ. 3.11.37
13. तै.ब्रा. 1.1.2

**कृत्तिकास्वग्निमादधीत।**
**एतद्वा अग्नेर्नक्षत्रम्। यत्कृत्तिकाः।**
**स्वायामेवैनं देवतायामाधाय।**
**ब्रह्मवर्चसी भवति** इति।[14]

कृत्तिकानक्षत्रस्य अग्निदेवताकत्वं प्रसिद्धम्। श्रुतावपि – 'कृत्तिकानक्षत्रमग्निर्देवता' इति[15] निर्दिष्टम्। अतः कृत्तिकानक्षत्रयुतेऽहनि अग्न्याधाने सति स्वरूपभूतायामेव देवतायामाधानं कृतं भवति। अपि च अग्नेः ब्राह्मणाभिमानिदेवत्वात् अग्नेः प्रसादेन आधीयमानः यजमानोऽपि ब्रह्मवर्चससम्पन्नः भवति। अथ कृत्तिकानक्षत्रं विधायास्मिन् पक्षे कञ्चिद्दोषमपि प्रदर्शयति। तद्यथा –

**अथो खलु। अग्निनक्षत्रमित्यपचायन्ति। गृहान् ह दाहुको भवति** इति[16]।

वैदिकाः शास्त्राभिज्ञाः खलु कथयन्ति यत् – अग्निनक्षत्रत्वात् कृत्तिकायाः तस्मिन् नक्षत्रयुतेऽहनि आधाने अयमग्निः यजमानस्य गृहदायकोः भवति। यतो हि अग्निः स्वयमेव दहनशीलः, तत्रापि स्वकीयनक्षत्रे आधाने अतिशयेन दहनशीलः स्यात्। अतः कृत्तिकास्वग्न्याधानं न कुर्यादिति पक्षः। गुणदोषप्रदर्शनपूर्वकं कृत्तिकानक्षत्रं विधाय नक्षत्रान्तरं विधत्ते –

– रोहिणीनक्षत्रविधानम् –

**यो रोहिण्यामग्निमाधत्ते। ऋध्नोत्येव।** इति।[17]

प्रजापतिः रोहिण्यामग्निमसृजत। ततः सर्वे देवाः रोहिण्यामग्न्याधानमकुर्वन्। अतः तस्मिन् नक्षत्रे अग्न्याधानं कृत्वा यजमानः समृद्धिं प्राप्नोति। अथ नक्षत्रान्तरं विधत्ते –

– पुनर्वसुनक्षत्रविधानम् –

**यः पुरा भद्रः सन्पापीयान्स्यात्। स पुनर्वस्वोरग्निमादधीत।**
**पुनरेवैनं वामं वसूपावर्तते। भद्रो भवति।** इति[18]।

पुरा अश्रद्धालवो भूत्वा अग्न्याधानमकुर्वन् देवाः। श्रद्धाराहित्यादग्निः तेभ्यः अपगतः। अग्निना सह तेषामैश्वर्यमप्यपगतम्। अतः देवाः पुनर्विचार्य अग्नेराधानं पुनर्वसुयुते दिने कृत्वा अपगतमैश्वर्यं पुनर्लब्धवन्तः। अतः यः कोऽपि पुरा धनिकः सन् कालान्तरे केनापि कारणेन निर्धनः अभवत् सः पुनर्वसुनक्षत्रे अग्निमादध्यात्। यः पुनर्वसु-नक्षत्रे अग्न्याधानं सः अपगतं धनं पुनः प्राप्य सर्वेषां मध्ये पूर्ववत्पूजितो भवति।

– पूर्वफल्गुनीनक्षत्रविधानम् –

**यः कामयेत दानकामा मे प्रजाः स्युरिति।**
**स पूर्वयोः फल्गुन्योरग्निमादधीत।**
**अर्यम्णो वा एतन्नक्षत्रम्।**
**यत्पूर्वे फल्गुनी। अर्यमेति तमाहुर्यो ददाति।**
**दानकामा अस्मै प्रजा भवन्ति।** इति[19]।

यः यजमानः सर्वे मनुष्याः मह्यं दानं प्रयच्छेदिति इच्छति सः पूर्वफल्गुनीनक्षत्रे अग्नीनादध्यात्। एवं सति सर्वे प्रजाः तस्मै यजमानाय दानकामा भवन्ति। एतन्नक्षत्रमर्यमादेवताकम्। तच्च प्रपञ्चितम् – 'फल्गुनी नक्षत्रमर्यमा देवता' इत्यत्र[20]। सायणाचार्यः अत्र प्रसङ्गादर्यमा इति पदस्य निर्वचनं प्रदर्शयति – 'अरीन् यमयति धनदानेन वशीकरोतीत्यर्यमा धनस्य दाता' इति[21] स्वीयतैत्तिरीयब्राह्मणभाष्ये।

– उत्तरफल्गुनी-नक्षत्रविधानम् –

**यः कामयेत भगी स्यामिति।**

---

14. तै.ब्रा. 1.1.2
15. तै.सं. 4.4.10
16. तै.ब्रा. 1.12
17. तै.ब्रा. 1.1.2
18. तै.ब्रा. 1.1.2
19. तै.ब्रा. 1.1.2
20. तै.सं. 4.4.10
21. तै.ब्रा. 1.1.2

**स उत्तरयोः फल्गुन्योरग्निमादधीत।**
**भगस्य वा एतन्नक्षत्रम्। यदुत्तरे फल्गुनी।**
**भग्येव भवति**। इति[22]।

ऐश्वर्यादिषड्गुणाः भगशब्देनोच्यन्ते। तदुक्तम् –

**ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः।**
**ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा**। इति।[23]

उत्तरफल्गुनी नक्षत्रस्य देवता भगः भवति। अतः तस्मिन्नक्षत्रे अग्निमाधाय यजमानः भगमैश्वर्यादिषट्कं प्राप्नोतीति फलितम्। उत्तरफल्गुनीनक्षत्रस्य भगदेवताकत्वं प्रपञ्चितम् – 'फल्गुनी नक्षत्रं भगो देवता' इति[24]।

– चित्रानक्षत्रविधानम् –

**यो भ्रातृव्यवान्स्यात्। स चित्रायामग्निमादधीत।**
**अवकीर्यैव भ्रातृव्यान्।**
**ओजो बलमिन्द्रियं वीर्यमात्मन्धत्ते**। इति।[25]

अत्र इतिहासमाह ब्राह्मणे। पुरा खलु कालकञ्जनामकाः असुरा आसन्। तान् जेतुकामः इन्द्रः तदीयाग्निचयनयागे स्वकीयामिष्टकां स्थापितवान्। तदानीमिन्द्रः मनस्येवमचिन्तयत् – 'एषा मदीया इष्टका विचित्रफलसाधिका चित्रानामधेययुक्ता' इति[26]। तया इष्टकया इन्द्रः भ्रातृव्यान् शत्रून् विजित्वा ओजो बलमिन्द्रियञ्च लब्धवान्। अतः यजमानः चित्रानक्षत्रे अग्निमाधाय शत्रून् विनाश्य ओजोबलादिकं प्राप्नोतीति।

तदित्थं तैत्तिरीयब्राह्मणे कृत्तिका, रोहिणी, पुनर्वसु, पूर्वफल्गुनी, उत्तरफल्गुनी, चित्रा इति षट् नक्षत्राणि अग्न्याधानाय उपदिष्टानि सन्ति। आपस्तम्बश्रौतसूत्रे अन्यान्यपि नक्षत्राणि विहितानि सन्ति। तद्यथा – 'मृगशीर्षे ब्रह्मवर्चसकामो यज्ञकामो वा'इति[27] मृगशिरानक्षत्रस्य विधानम्। अपि च – 'हस्ते यः कामयेत प्र मे दीयेतेति'[28] हस्तनक्षत्रस्य विधानम्। तत उत्तरे – 'विशाखयोः प्रजाकामोऽनुराधेष्वृद्धिकामः श्रवणे पुष्टिकामः उत्तरेषु प्रोष्ठपदेषु प्रतिष्ठाकामः' इति[29] सूत्रेण विशाखा, अनुराधा, श्रविष्ठा, उत्तरप्रोष्ठपदा इत्येतानि नक्षत्राण्यपि अग्न्याधानाय विहितानि सन्ति। एतेषु यथायथं स्वसूत्रोक्तसम्प्रदायादिविध्यनुसारेण आधानाय नक्षत्रं चेतव्यम्।

**आधनक्रमः सम्भाराः द्रव्याणि पात्राणि च** –

आधानकर्मकर्मणः फलं किमिति पृष्टे – त्रयाणां गार्हपत्य-आहवनीय-दक्षिणाग्नि-नामकानाम्, अथवा सभ्यआवसथ्येन सह पञ्चानामग्नीनां वा सिद्धिरेवेति वक्तव्यम्। अत इदं स्वतन्त्रं कर्म भवति। न कर्मान्तरस्य अङ्गमिति चिन्तनीयम्। श्रौताग्न्यायतनानि प्रधानतया त्रीणि भवन्ति। प्राच्यां दिशि चतुरस्राकारकुण्डे स्थापितः आहवनीयाग्निः, पश्चिमायां दिशि वर्तुलाकारकुण्डे स्थापितः गार्हपत्याग्निः, दक्षिणस्यां दिशि अर्धचन्द्राकारकुण्डे स्थापितः दक्षिणाग्निरिति बोध्यम्। मध्ये वेदिस्थानम्। आदौ यजमानः सङ्कल्पं कृत्वा ततः ऋत्विग्वरणं करोति। वृतः अध्वर्युः अश्वत्थवृक्षस्य शाखां छित्वा तां द्वेधा विभज्य अरणी निर्माति। द्वे अरणी भवतः, एका पूर्वारणिः अपरा उत्तारारणिरिति। एषा अरणिः चतुरङ्गुलमुत्सेधां द्वादशाङ्गुलविस्तीर्णां षोडशाङ्गुल-मायतामिति बौधायनमतम्। चतुर्विंशत्यङ्गुलमिति कात्यायनमतम्।

– पार्थिवसम्भाराः

आहवनीयाद्यायतनेषु (कुण्डेषु) स्थापनाय सप्त

22. तै.ब्रा. 1.1.2
23. तै.सं.सा.भा. 4.5.10
24. तै.सं. 4.4.10
25. तै.ब्रा. 1.1.2
26. तै.ब्रा. 1.1.2.4
27. आ.श्रौ.सू. 5.3.6
28. आ.श्रौ.सू. 5.3.12
29. आ.श्रौ.सू. 5.3.14

अष्टौ वा पार्थिवसम्भाराः सप्त वानस्पत्यसम्भाराश्चा- नेतव्याः। सप्त सम्भाराणां पक्षे शर्कराणां लोपः स्यात्। हिरण्यस्य त्ववश्यंभावित्वात्। तदुक्तं वृत्तिकारेण – 'सप्तपक्षे शर्कराणां लोपः, हिरण्यावश्यंभावित्वात्' इति[30]। यद्यपि 'सप्त पार्थिवान् सम्भारानाहरति' इति[31] आपस्तम्बः। परमत्र धूर्तस्वामिभाष्ये श्रीरामाग्निचिद्वृत्तौ – 'हिरण्यान्ता अष्टावुपदिष्टाः' इति[33]। पृथिवीसम्बद्धाः पार्थिवाः। वानस्पत्यसम्भाराः वृक्षसम्बद्धाः। ते च के इति प्रथमं जानीमः। हिरण्यसहिता अष्टौ पार्थिवसम्भाराः इत्थं भवन्ति –

अत्र निर्दिष्टानि पात्राणि द्रव्याणि च सामान्यतया एव

| क्र.सं. | पार्थिवसम्भाराणां नाम | हिन्द्यां नाम | आङ्ग्लभाषायां नाम |
|---|---|---|---|
| 1 | सिकताः | रेत/बालू | Sand |
| 2 | ऊषरमृत् | खारा/लवणयुक्त मिट्टी | Salty Soil |
| 3 | मूषिकोत्खाता मृत् | मूषक द्वारा खोदी गई मिट्टी | Soil dug-up by Rat |
| 4 | अशोष्यजलाशयमृत् | ऐसा तालाब की मिट्टी जहाँ कभी सूखा नहीं हो | Soil from pool where water has never dried |
| 5 | शर्कराः/क्षुद्रपाषाणाः | कंकड़ | Pebbles |
| 6 | वल्मीकमृत् | वल्मीक की मिट्टी | Soil of Anthill |
| 7 | वराहमुखोत्खाता मृत् | वराह द्वारा खोदी गई मिट्टी | Soil dug-up by boar |
| 8 | हिरण्यम् | सोना | Gold |

– वानस्पत्यसम्भाराः –

| क्र.सं. | सम्भाराणां नाम | हिन्द्यां नाम | आङ्ग्लभाषायां नाम |
|---|---|---|---|
| 1 | अश्वत्थकाष्ठशकलानि | पीपल वृक्ष के टुकड़े | Pieces of Ficus Religiosa or Sacred Fig |
| 2 | औदुम्बरकाष्ठशकलानि | गूलर वृक्ष के टुकड़े | Pieces of Ficus Racemosa or Cluster Fig Tree |
| 3 | शमीवृक्षकाष्ठशकलानि | शमी/खेजरी वृक्ष के टुकड़े | Pieces of Prosopis Spicigera Linn |
| 4 | अशनिहतकाष्ठशकलानि | बिजली से आहत वृक्ष के टुकड़े | Pieces of Tree struck by lightning |
| 5 | पलाशवृक्षकाष्ठशकलानि | पलाश वृक्ष के टुकड़े | Pieces of Butea Monosperma |
| 6 | विकङ्कतवृक्षकाष्ठशकलानि | बिलांगड़ा वृक्ष के टुकड़े | Pieces of Flacourtia Indica or Governor's Plum |
| 7 | पद्मपत्राणि | कमल के पत्ते | Lotus-leaves |

30. आ.श्रौ.सू. 5.1.4 रामाग्निवृत्तिः
31. आ.श्रौ.सू. 5.1.5
32. आ.श्रौ.सू. 5.1.5 धूर्तस्वामिभाष्यम्
33. तत्रैव रामाग्निचिद्वृत्तिः

– आधानकर्मणि उपयुज्यमानानि पात्राणि द्रव्याणि च – –

| क्र.सं | द्रव्याणां/पात्राणां नाम | अपेक्षितमात्रा | उपयोगः |
|---|---|---|---|
| 1 | ग्रामादिचिह्नभूतस्य अश्वत्थवृक्षस्य समिधः | 03 | ब्रह्मौदनपचनाग्नौ प्रक्षेपणाय। |
| 2 | आश्वत्थसमिधः | 09 | गार्हपत्यादित्रिषु अग्निषु यथाविधिनिक्षेपणाय। |
| 3 | शमीमयी समिधः | 12 | गार्हपत्यादित्रिषु अग्निषु यथाविधिनिक्षेपणाय। |
| 4 | वैकङ्कत्यः समिधः | 03 | गार्हपत्यादित्रिषु अग्निषु यथाविधिनिक्षेपणाय। |
| 5 | पात्रम् पैत्तलं ताम्रमयं वा | 01 | ब्रह्मौदनपचनार्थम् |
| 6 | शरावाः | --- | अग्निप्रणयनार्थम् |
| 7 | दर्वी पैत्तली ताम्रमयी वा | 01 | ओदनस्य उद्धरणार्थम् |
| 8 | गोः आज्यम् | --- | होमार्थम् |
| 9 | वत्सतर्यः (विवृत्तस्तन्यपानाः) | 03 | अध्वर्युनामकाय ऋत्विजे दानार्थम् |
| 10 | यज्ञीयवृक्षकाष्ठानि | --- | अग्निसमिन्धनार्थम् |
| 11 | अश्वः | 01 | गार्हपत्यादौ पदनिक्षेपणार्थम् |
| 12 | अजः | 02 | अग्न्यायतनसमीपे बन्धनार्थं दक्षिणार्थं च |
| 13 | रथचक्रम् | 01 | अश्वस्य दक्षिणभागे आवर्तनार्थम् |
| 14 | गावः | 12 | दक्षिणादानार्थम् |
| 15 | पूर्णपात्रम्<br>(128 मुष्टिपरिमितं व्रीहियवादिधान्यं पूर्णपात्रमिति उच्यते) | 01 | दक्षिणादानार्थम् |
| 16 | वासः | --- | दक्षिणादानार्थम् |
| 17 | स्त्रीपुंरूपौ मिथुनौ गावौ | 02 | दक्षिणादानार्थम् |
| 18 | नूतनः रथः | 01 | दक्षिणादानार्थम् |
| 19 | वहनसमर्थः अश्वः | 01 | दक्षिणादानार्थम् |
| 20 | अनड्वान् | 01 | दक्षिणादानार्थम् |
| 21 | ऋत्विजः | 04 | अध्वर्युः, ब्रह्मा, होता, आग्नीध्रश्च |

सङ्गृहीतानि। श्रौताग्न्याधानसमनन्तरमेव पवमानेष्टिः अनुष्ठेया भवति। पवमानस्य इष्टिरूपत्वात् इष्टिकर्मणि उपयुज्यमानानां द्रव्याणां पात्राणाञ्चाप्यावश्यकता वर्तते। अतः तदपि सङ्गृह्णाद्यजमानः।

– आधानक्रमः

पूर्वसङ्गृहीतान् सम्भारान् क्रमशः द्वेधा विभज्य एकधर्मं पुनर्द्वेधा विभज्य, एकं भागं गार्हपत्यायतने एकं दक्षिणाग्न्यायतने प्रक्षिपेत्। अत्र अवशिष्टमर्धं त्रेधा

विभज्य आहवनीय-सभ्य-आवसथ्यायतनेषु स्थापयेत्। कतिपय याज्ञिकाः सभ्यावसथ्ययोः आधानं न कुर्वन्ति। अस्मिन् पक्षे सभ्यावसथ्योः भागमविभज्य आहवनीये एव प्रक्षेप्तव्यः।

**पञ्चाग्नीनामाधानपक्षे सम्भारविभाजतालिका**




सर्वप्रथमं गार्हपत्यस्याधानं भवति, ततः दक्षिणाग्नेः आधानं, ततः आहवनीयस्याधानं, ततः सभ्यावसथ्ययोरिति क्रमः। अत्र गार्हपत्यस्यायतनं वृत्ताकारकं, दक्षिणाग्नेरायतनं अर्धचन्द्राकारकम्, आहवनीयस्य चतुरस्राकारकञ्च निर्मातव्यमिति नियमः।

स्वसूत्रोक्तप्रकारेण अग्नीनाधाय तस्मिन्नेवाहनि पवमानेष्टिरनुष्ठेया। अत्र विकल्पेनापि कालविधानं वर्तते। यथ – 'द्वादशाहे द्व्यहे त्र्यहे चतुरहेऽर्धमासे मास्यृतौ संवत्सरे वा' इति[34] आपस्तम्बेन विहितत्वात्। अत्र यदि सोमपूर्वकाधानं नास्ति चेत्संवत्सरात् प्राक् पवमानेष्टिरनुष्ठीयते तस्मिन्नेव दिने सायमग्निहोत्रं प्रारभेत। पवमानेष्टौ त्रीणि हवींषि भवन्ति। पवमानेष्टिविधानं तैत्तिरीयब्राह्मणे श्रूयते – 'त्रीणि हवींषि निर्वपति। विराज एव विक्रान्तं यजमानोऽनु विक्रमते' इति[36]। अपि च देवताः विधत्ते – 'अग्नये पवमानाय। अग्नये पवमानाय। अग्नये पावकाय, अग्नये शुचये' इति37। सर्वत्र अग्निदेवताकत्वादष्टाकपालः पुरोडाशः द्रव्यरूपेण भवति।

**उपसंहारः –**

अग्निहोत्रम्, इष्टिः, सोमश्चेति प्रकृतियागाः त्रयः भवन्ति। यस्त्र कस्यापि श्रौतयागस्यानुष्ठानाय सर्वप्रथममग्न्याधानं कर्तव्यम्। अत्र – अध्वर्युः, ब्रह्मा, होता, अग्नीध्रश्चेति चत्वारः ऋत्विजः भवन्ति। विहितेन त्रैवर्णिकेनावश्यमग्न्याधानमनुष्ठेयम्। अथवा अनाहिताग्निरूपः दोषः सम्भवति। अवधेयं यत् पितुरनाहिताग्नित्वे पुत्रस्य आधाने अधिकारः नास्ति। ज्येष्ठभ्रातुरनाहिताग्नित्वेऽपि एष एव नियमः, किन्तु ज्येष्ठभ्राता अनुमतः स्वीयमाधानं कर्तुं शक्यते। एनां शास्त्रमर्यादामनुसृत्य एकस्मिन्नेव गृहे बहवः अग्नयः भवितुमर्हन्ति। एवं सति गृहे बह्व्यः अग्निशालाः भवितुमर्हन्ति। वस्तुतः आधानानुष्ठाने सन्ति बहवः विषयाः। सर्वमेतत्ब्राह्मणश्रौतसूत्रादिग्रन्थादवगम्य अनुष्ठेयम्। यज्ञानुष्ठानेन सकलविधं श्रेयः प्राप्तुं शक्यते। अत एव 'यज्ञे सर्वं प्रतिष्ठितम्' इति नारायणोपनिषदि श्रूयते। श्रुतिविहितमिदमाधानं कर्म अनुष्ठाय अग्निहोत्र-दर्शपूर्णमास-ज्योतिष्टोमादिसाधनेन स्वस्य अपि च समग्रस्यापि विश्वस्य कल्याणं जनयाम इति शम्।

**– सहायकाचार्यः, वेदविभागः,**
**केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊपरिसरः,**
**( संसदः अधिनियमेन स्थापितः )**
**विशालखण्डः – 4, गोमतीनगरम्,**
**लखनऊ–226010 ( उ.प्र. )**
**मो. 9419295841**

34. आ.श्रौ.सू. 5.21.2
35. आ.श्रौ.सू. 5.21.3
36. तै.ब्रा. 1.1.5
37. तै.ब्रा. 1.1.5

**सन्दर्भग्रन्था: -**

1. श्रीमत्सायणाचार्यविरचितभाष्यसमेता कृष्णयजुर्वेदीयतैत्तिरीयसंहिता - प्रथमो भाग:, आनन्दाश्रममुद्रणालय:, 1940

2. कृष्णयजुर्वेदीय तैत्तिरीयब्राह्मणम्, श्रीमत्सायणाचार्यविरचितभाष्यसमेतम्, आनन्दाश्रममुद्रणालय:, 1999

3. कृष्णयजुर्वेदीयं तैत्तिरीयारण्यकम्, श्रीमत्सायणाचार्यविरचितभाष्यसमेतम्, आनन्दाश्रममुद्रणालय:, 2008

4. आपस्तम्बश्रौतसूत्रम् (श्रीरामाग्निचिद्वृत्तिसहितधूर्तस्वामिभाष्यभूषितम्) 1-5 प्रश्ना:, श्रीवेङ्कटेश्वरवेदविश्वविद्यालय:, तिरुपति: 2021

5. श्रौतयज्ञप्रक्रियापदार्थानुक्रमकोष: प्रथम: भाग:, ब्रह्मलीन पण्डित पीताम्बरदत्त शास्त्री, राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली, 2005

6. शुक्लयजुर्वेदसंहिता (महीधरभाष्यसहित), हिन्दी व्याख्याकार - डॉ. रामकृष्ण शास्त्री, चौखम्बा विद्याभवन, वाराणसी 2013

7. यज्ञतत्त्वप्रकाश:, श्रीचिन्नस्वामिशास्त्री, मद्रास् ला जर्नल् प्रेस, 1953

8. मीमांसादर्शनम् (श्रीशबरस्वामिभाष्यसमेतम्), The Asiatic Society of Bengal, 1873

9. Srauta Sutra of Apastamba with commentary of Rudradatta, (Vol-I) Edited by Dr. Richard Garbe, Asiatic Society, 1882

10. तैत्तिरीयसंहिता (1-4 काण्डा:), Heritage India Educational Trust, Chennai, 2009

# 3. कोरोना तु गमिष्यति......

(शार्दूलविक्रीडितम्)

❑ डॉ. प्रीति: आर. पुजारा

कोरोना तु गमिष्यति प्रियतमे! भीति: कथं सेव्यते
अम्भोजे तु पुना रमिष्यति प्रिये पेशस्करी चञ्चला।
नीडस्थश्चटकोऽपि पास्यति जलं चञ्चो: प्रियाया मुदा
उत्सङ्गे वरुणालयस्य रमणी नर्तिष्यति वेगिनी।।१।।

धाविष्यन्ति धरातले सखि पुनश्चक्राणि यानस्य हा
आकाशं तु विमाननादरणितं घोरं विगर्जिष्यति।
देवा भक्तपृथक्कृता: क्षणमपि स्थास्यन्ति नैवाधुना
द्वाराणि प्रभुमन्दिरस्य भुवि हे उद्घाटितान्यद्यत:।।२।।

सेविष्यन्ति सरस्वतीं भगवतीं विद्यार्थिन: कर्मठा:
तेषां हासविलासनादभरितं श्रीशारदामन्दिरम्।
जल्पाहारगृहे भविष्यति पुन: कोलाहलो बालकै:
शालायानसमाहृता: सहचरा: शोभान्विता: सुन्दरा: ।।३।।

पण्यानि क्रय-विक्रयस्य नगरे स्त्रीणां नुपूरैर्यथा
गुञ्जिष्यन्ति धरातले प्रतिकलं हट्टा: पुनर्जीविता:।
वृद्धानां दशहीनहासभरिता नन्दिष्यति सा सभा
उद्यानानि समाकुला जनगणै: शून्याश्चिकित्सालया:।।४।।

कोरोनासमये यथा रमणि हे! हास्ये दृढं बन्धनं
अभ्यस्ता: सततं वयं सुललिते अक्ष्णा प्रवक्तुं सदा।
भाषा सा जगता रमे! सुखकरी स्पर्शस्य विस्मारिता
मन्येऽहं शिवशम्भुना पुनरयं भस्मीकृतो मन्मथ:।।५।।

आस्ये यत्पटलं बभूव कठिनं दूरीकृते सर्वथा
पीयूषं मुखमण्डलस्य दयिते पेपीयतेऽहर्निशम्।
ओष्ठौ ते नवरागरङ्गभरितौ स्पर्धिष्यत: पूर्ववत् -
प्रत्यूषेण सह प्रिये मद्युतौ वर्धिष्यतो मे तृषाम्।६।।

- सहायकाचार्या, संस्कृतविभाग:,
डी.सी.एम. कला-वाणिज्य महाविद्यालय:, वीरमगाम-
अहमदावाद- गुजरात

# तारांकितशंकराष्टकम्

❑ प्रो. ( डॉ. ) ताराशंकरशर्मा 'पाण्डेयः'

### तारांकितः शंकरः

शून्यं श्रावणमासजातजलदैः कालं नभोमण्डलं
जातं चन्दिरचन्द्रिकाविरहितं कान्तामनो व्याकुलम्।
मेघाच्छादितकालिमाविलसितं कान्तास्यचन्द्रं तदा
दृष्ट्वाकाशितमानसो रसयते तारांकितः शंकरः।।१।।

### दीनानाथ!

दीनानाथ प्रभो त्वं चरणशरणको दीनहीनाश्रयोसि
दीनानाथोऽहमस्मि प्रभुशरणगतो दीनहीनप्रधानः।
जीवात्माधारभूतः परमपदपरः संसृतीशो गिरीशो
जीवात्माधारहीनोऽहमपदजननः संसृतीशं गृणामि।।२।।

### गङ्गाधरो ध्यायते

तारामूर्तिरुदेति कान्तिलहरी तारापतिश्शंकरः
तारानाथशिरा हिमालयसुतानाथो मनोजोद्भवः।
आकाशाङ्गदिगंगनापतिरभूद्दिग्वास ईशश्शिवो
वामार्धाङ्गधरो धराधरधवो गङ्गाधरो ध्यायते।।३।।

### कान्तचेतःप्रसादा

उत्प्रेक्षोदीक्षमाणा दशगुणगुणिता कान्तचेतःप्रसादा
प्रेमाभिव्यक्तिरूपा सुमसमसमता सौकुमार्यानुरागा।
रीतिप्रीतिप्रसन्ना रसमदनयना हावभावातिरेका
दिव्या वागर्थमूर्ती रसयति रुचिरं कापि कान्ता
किशोरी।।४।।

### केदारनाथशिवः

अध्याहारवचोविलासविलसत्-क्षपावतंसोद्धरो
गौरीशो गणनाथपुत्रवलितः काशीप्रकाशाकरः।
श्रीगोवर्धनमुख्यनन्दिवहनः कैलासवासीश्वरः
पूज्यो मान्यतमस्तमोहरमणिः केदारनाथशिवः।।५।।

### पार्वतीयं चकर्ष

शीर्षे गङ्गातरङ्गं वसनमिव सितं चारुचन्द्रावतंसे
ज्ञात्वा क्रोधात्सपत्न्या विचलितहृदया पार्वतीयं चकर्ष।
गङ्गावासोञ्चलार्द्रे जलमणिपृषतः शीतशीता ववर्षुः
शंकालंकाग्निशान्तिस्तदुपरि प्रियता साधु गौर्य्याः
सुजाता।।६।।

### गोसम्प्रदानातुरः

कर्त्ताहं पदशास्त्रकर्मकरणो गोसम्प्रदानातुरः
प्रापादानपरायणोधिकरणे सम्बन्धविच्छेदकः।
भोःसम्बोधनकारकेभिलषणो नो स्यां कथञ्चित् प्रभो!
विश्वाबन्धनकारकाणि प्रतिपच्-
छम्भोस्तवाराधनम्।।७।।

### काशीस्थवासाश्रयः

धर्माधारधुरन्धरः शशिधरो गङ्गाधरोऽहेर्धरो
दत्तक्ष्वेडनिधाननीलगलरुक् काशीस्थवासाश्रयः।
चातुर्वेदधनागमोद्विकसित-स्वान्तो वरेण्यश्च यो
वेदीनिष्ठितविश्वनाथविबुधो ध्यायेत लोकैः सदा।।८।।

इति जयपुरवास्तव्येन राष्ट्रपतिसम्मानित-
प्रतिनवबाणभट्ट- पण्डितश्रीमोहनलालशर्मपाण्डेयात्मजेन
श्रीकल्लाजी- वैदिकविश्वविद्यालयकुलपतिना
प्रोफेसर(डॉ.) ताराशंकरशर्मपाण्डेयेन प्रणीतं
'तारांकितशंकराष्टकम्' सम्पूर्णम्।

- 2381, पाण्डेय भवन, खजाने वालों का
रास्ता, जयपुर ( राज. ) 302001

# तव कथामृतम्

❑ आचार्यः पं.नथमलशास्त्री दाधीचः

क्रमागतम् -

**एषा बुद्धिमतां बुद्धिर्मनीषा च मनीषिणाम्।**
**यत्सत्यमनृतेनेह मर्त्येनाप्नोति मामृतम्।।**

- भा. ११/२९/२२

सुरदुर्लभमिमं जलबुद्बुद्वत्क्षणभङ्गुरमपि मानुषं देहं प्राप्योद्धरेदात्मनाऽऽत्मानमिति हृदि निश्चित्यान्तेऽनन्तं ब्रह्मसौख्यं प्राप्तुं दिव्यञ्च तद् भगवद्धाम प्रयातुं नरः सावधानतया प्रयतेत, भक्त्या भगवन्तञ्च समाश्रयेत। स्वविवेकबुद्ध्या विचिन्त्यानेनानृतेन नश्वरेण मर्त्यशरीरेण तपस्तप्त्वा भक्त्या च मां समाश्रित्य नरः परं सत्यस्वरूपममृतं मां प्राप्नुयादित्येव बुद्धिमतां मनीषिणामुत्तमा धृतिगृहीता बुद्धिर्मनीषाऽऽस्ते यया मनस्विनां परमार्थसिद्धिर्जायते। एवमुद्धवः प्रभासे भगवता प्रतिबोधितः। अत्रापि हे नाथ! **'देहि मे शोभनां प्रज्ञां त्वत्पदाब्जे रतिं पराम्'** इत्थं भक्त्या भक्तवत्सलं भगवन्तं संस्तुत्य समुद्दिष्टं **'तव कथामृतम्'** प्रस्तूयते यथाज्ञानम्।

अथैकदा परावरज्ञो महर्षिर्बादरायणो भगवान् वेदव्यासः सरस्वत्यास्तटे समासीनोऽचिन्तयत्। मया खलु सप्तदशपुराणानि विरचितानि। भारतव्यपदेशेन स्त्रीशूद्राणाञ्च श्रेयसे वेदार्थोऽपि निरूपितस्तथाप्यद्यावधि मया किमपि नैव विहितमिति मनोवृत्तिर्मामाकुलयति चेखिद्यते च मे मनः, अहो! किं परमहंसानां प्रियाः भागवताः धर्मास्तु प्राधान्येन मया नैव निरूपिताः? एवं चिन्तयतस्तस्याश्रमं ब्रह्मपुत्रो देवर्षिर्नारदः सौभाग्यात् समभ्यगात्। सहसा तदभिज्ञाय प्रत्युत्थाय च विप्रर्षिर्व्यास स्वागतं व्याजहार विधिवच्च देवर्षिं पूजयामास।

ततश्च सत्कृतो नारदो व्यासमेवं पप्रच्छ - महर्षे! सर्वार्थपरिबृंहितं महाभारताख्यं पञ्चमं वेदं विलिख्यापि भवानकृतार्थ इव कथं शोचति? देवर्षिणैवं पृष्टो वेदव्यासः स्वहृद्गतासंन्तोषहेतुं सर्वाञ्च मनोव्यथां कथयित्वा तदपाकरणोपायञ्चाप्यपृच्छत्। तन्निशम्य नारदः प्रत्यभाषत -

**भवतानुदितप्रायं यशो भगवतोऽमलम्।**
**येनैवासौ न तुष्येत मन्ये तद्दर्शनं खिलम्।।**
**यथा धर्मादयश्चार्था मुनिवर्यानुकीर्तिताः।**
**न तथा वासुदेवस्य महिमा ह्यनुवर्णितः।।**

- भा. १/५/८-९

महर्षे! भारते तु भवता स्वकीयकुलस्येतिहास-वर्णनप्रसंगेन केवलं धर्मादयः पुरुषार्थाः परिवर्णिताः, परं शोकमोहभयापहं भक्तिमहिमान्वितं भगवतः श्रीवासुदेवस्य सुविमलं यशः प्राधान्येन नैव वर्णितमित्यहं मन्ये। अतः सम्प्रति भवान् समाधिमास्थायोरुक्रमस्य भगवतो नारायणस्यावतारकथास्तद्विचेष्टितञ्च हृदि विचिन्त्य परमहंसानां भागवतान् धर्मान् परिवर्णयतु लोककल्याणहेतवे। उपायोऽयमात्मसन्तोषामृतप्राप्तये ज्ञेयः सेव्यश्चेति। ततश्च देवर्षिर्नारदः सृष्ट्यादौ यद् भगवता नारायणेन ब्रह्मणे प्रोक्तं तदेव दशलक्षणं भागवतं नाम पुराणं यत्पूर्वं स्वपित्रा श्रुतं समधिगतं वा चतुःश्लोकी-भागवतं वेदव्यासाय विनिर्दिश्य महर्षिद्वारा संस्तुतो हरिनाम संकीर्तयन् वीणाञ्च रणयन् यथेच्छं निर्जगाम। तत्कथाप्रसंगे श्रीशुकेनोक्तं परीक्षिताय राजर्षये। यथा -

**इदं भागवतं नाम पुराणं दशलक्षणम्।**
**प्रोक्तं भगवता प्राह प्रीतः पुत्राय भूतकृत्।।**
**नारदः प्राह मुनये सरस्वत्यास्तटे नृप।**
**ध्यायते ब्रह्म परमं व्यासायामिततेजसे।।**

- भा. २/९/४३-४४

अत्रतत्तत्त्वजिज्ञासायां भगवता प्रोक्तं '**चतुःश्लोकी-भागवतं**' विलिख्यते -

**अहमेवासमेवाग्रे नान्यद् यत्सदसत्परम्।**
**पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम्।।**
**ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि।**
**तद्विद्यादात्मनो मायां यथाऽऽभासो तथा तमः।।**
**यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु।**
**प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम्।।**
**एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः।**
**अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा।।**

- भा. २/९/३२-३५

हे ब्रह्मन्! अनन्ताः सुविस्तृताश्च मे नामधामरूपगुणा लक्षणलक्षिताश्च दिव्यलीलाः सन्ति। मे कृपाप्रसादात्तासां सारभूतं तत्त्वं स्वानुभूत्यां त्वं सम्यक् सन्धारय। सृष्ट्यादौ केवलमहमेक एवासम्। मामतिरिच्य स्थूलसूक्ष्मयोः कारणमज्ञानमपि नासीत्। यत्र च सृष्टिर्नास्ति तत्राप्यहमेवास्मि। अहमेव सृष्टिस्वरूपो विश्वरूपोऽस्मि। यत्किञ्चिदपि जगत्यां दृश्यते, प्रतीयते, तत्सर्वं सर्वभूतात्मभूतात्मा भूतभव्यभवत्प्रभुर्विश्वात्माऽहमेवास्मि। महाप्रलयान्ते यत्किञ्चिदवशिष्यते यच्च विलीयते तदप्यहमेवास्मि। अहमेव क्षराक्षरातीतः पुराणपुरुषोत्तमः सच्चिदानन्दघनस्वरूपो विभुः प्रभुरस्मि। अत्र वस्तुनि सत्यपि आकाशस्थग्रहनक्षत्रमण्डले राहुवन्मे प्रतीतिर्न जायते। इदमित्थं मे त्रिगुणात्मिका मायैव विज्ञेयेति। **मत्तः परतरं नान्यत् किञ्चिदस्ति धनंजय!** सर्वप्राणिनां पञ्चभूतरचितेषु शरीरेष्वाकाशादिपञ्चभूतानि कार्यरूपेण निर्मितानि प्रविशन्ति, परं पूर्वमेव सर्वप्राणिषु कारणरूपेण सर्वदा सर्वत्रावस्थितित्वात्सर्वकारणकारणमहमेवात्मरूपेण प्रविष्टोऽस्मि। **सर्वस्य चाहं हृदि सन्निविष्टः**। एवञ्च -

**ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः।**
**अनादिरादिगोविन्दः सर्वकारणकारणम्।।**

- ब्रह्मसंहिता

जगत्यामात्मदृष्ट्या तु मामतिरिच्यान्यद्वस्तु किमपि नास्त्यतोऽहं तेषु प्रविष्टोऽपि नैवास्मि, पूर्वमेव सदा सर्वत्र विद्यमानत्वादिति।

**अत्रास्तीति स्वीकृतिपरोऽन्वयविधिर्यथा** - ईश्वरः सर्वव्यापी निर्गुणो निराकारो निराधारो निराभासो निराश्रयोऽनन्तो निर्लिप्तः सीमातीतोऽव्यक्तः कालातीतः सच्चिदानन्दविग्रहोऽस्तीति।

**अत्र नास्तीति निषेधात्मको व्यतिरेकविधिर्यथा** - तन्निर्गुणं निष्क्रियम् परमात्मा साकारः सगुणो गतिशीलः सान्तः सीमितो नास्ति। स च क्रियाशीलो विकारवान्नास्ति। स हि व्यक्तो गिराज्ञानगोचरो नास्ति। कायेन मनसा बुद्ध्या प्राप्यो दृग्गोचरोऽपि नास्ति। एवमन्वयव्यतिरेकाभ्यां सर्वस्वरूपः परमेश्वरः सदा सर्वत्र सुस्थितोऽस्तीति वास्तविकं सत्तत्त्वमिति ज्ञेयम्। यतो हि **यत्सर्वत्र तदीक्षणमिति** भक्तिमतां भागवतानां भगवद्दृष्टिर्ब्रह्मविदां ज्ञानिनां ब्रह्मदृष्टिरुच्यते।

हे ब्रह्मन्! अविचलसमाधिमास्थाय त्वं ममास्मिन् शाश्वतसिद्धान्ते परिनिष्ठितो भव। अनेन तत्त्वज्ञानेन कल्पकल्पान्तरेष्वविरतं सृष्टिकर्मनिरतोऽपि भवान् मन्मायामोहितो नैव भविष्यतीति मे वचनम्।

तन्निशम्याद्वैतवेदान्तदर्शनो वेदव्यासः समाधिस्थो भूत्वा ध्यानावस्थायां भगवतो नारायणस्य परं सत्यमवतारलीलारहस्यं हृदि सुचिलोक्यैव समाधिभाषायां श्रीमद्भागवतमहापुराणमसृजत्।

अत्र ग्रन्थादौ प्रथमश्लोके ब्रह्मसूत्रात्मके परमसत्यप्रतिष्ठायां **सत्यं परं धीमहीति गीयते।**

**जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्,**
**तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः।**
**तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा,**
**धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि।।**

- भा. १/१/१

येन परमसत्येन परमात्मना कल्पकल्पान्तरेषु

जगतां सृष्टिस्थितिप्रलयक्रियाः क्रियन्ते। यतोहि सः समग्रसद्रूपपदार्थेष्वनुगतोऽस्ति, पृथक्चास्ते सत्पदार्थेभ्यः। उक्तञ्च नारायणकवचे -

**यथा हि भगवानेव वस्तुतः सदसच्च यत्।**
**सत्येनानेन नः सर्वे यान्तु नाशमुपद्रवाः।।**

- भा. ६/८/३१

वस्तुतः प्रकृतिपुरुषात्मकं सदसच्च जगद् यद्दृश्यते, तत्सर्वं भगवानेवास्तीति हृदि सन्धारितेनानेन निर्विकल्पेन सत्येन भक्ति-साधन-बाधकाः सांसारिकाः सर्वे उपद्रवाः विनश्यन्तीति भागवतसिद्धान्तो ध्येयोऽस्ति।

स च चेतनश्चेतनानां न हि कश्चिज्जडपदार्थोऽस्ति सः स्वयम्भूः स्वराट् स्वयंप्रकाशः सर्वतन्त्रस्वतन्त्रो मायाधीशोऽस्ति, न तु जीववत् परतन्त्रो मायाधीनः। तत्रादौ स हि परमेश्वरो विराट्स्वरूपः सहस्रशीर्षापुरुषः सहस्राक्षः सहस्त्रपात् स्वसंकल्पशक्तेः स्वल्पांशेन हिरण्यगर्भाय ब्रह्मणे वैदिकं ज्ञानं प्रददौ। सर्वकारण-कारणस्य भगवतो नारायणस्य नानावतारकथाप्रसंगेषु, ब्रह्मजिज्ञासायां धर्मजिज्ञासायां वा महान्तोऽपि कवयो विचक्षणाः विमुह्यन्ति।

यथा च भौतिकेऽस्मिन्संसारेऽप्रमेयतेजोमण्डले सूर्यरश्मिषु जलस्य, जले च स्थलस्य, स्थले च जलस्य मृगतृष्णावद्विभ्रमो जायते, तथैव यस्मिंस्त्रिगुणात्मिकेयं मायाकृता सृष्टिर्जाग्रत्स्वप्नसुषुप्तिस्वरूपा यद्यपि मिथ्याऽऽस्ते, तथाप्यधिष्ठानसत्ताप्रभावात्सत्यवत्प्रतीयते। यश्च सर्वदा सर्वथा सर्वत्राऽविद्यामायातस्तन्मायाशक्तेः कार्यरूपजगतश्च विमुक्तः सन् विराजते, तं स्वतेजसा निरस्तकुहकं (अज्ञानहेतुकृतमोहमदान्धकार-विध्वंसकम्) परमं सत्यं परं ब्रह्म परमात्मानं वयं ध्यायामः।

एवमेव ग्रन्थान्तेऽपि 'सत्यं परं धीमही'ति ध्यायन् व्यासः परम्परागतं भागवतज्ञानं गृणाति -

**कस्मै येन विभासितोऽयमतुलो ज्ञानप्रदीपः पुरा,**
**तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा।**
**योगीन्द्राय तदात्मनाथ भगवद्राताय कारुण्यत-**
**स्तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि।।**

- भा. १२/१३/१९

पुरा येन सत्यस्वरूपेण परमात्मनाऽयमतुलो ज्ञानप्रदीपः कस्मै (ब्रह्मणे) चतुःश्लोकी-भागवताख्येन प्रदीपितः। ततश्च ब्रह्मणा तज्ज्ञानं तद्रूपेणैव स्वपुत्राय नारदाय प्रोक्तम्। देवर्षिर्नारदश्च कृष्णद्वैपायनाय मुनये (व्यासाय) तद्भागवतं न्यगादीत्। व्यासेन च स्वात्मजाय योगीन्द्राय शुकाय प्रोक्तम्। ततश्च (स्वधामानुगते भगवति कृष्णे त्रिंशद् (३०) वर्षाधिकगते कलौ भाद्रपद शु. नवमीतः) अदभ्रदयो भगवान् ब्रह्मरातः शुकाचार्यो गङ्गाकूले प्रायोपविष्टाय विष्णुराताय राजर्षये परीक्षिताय तदेवाशोकं विमलं विशुद्धममृतं ज्ञानमुपदिदेश। तदेव परं ब्रह्म परं सत्यं वयं ध्यायामः।

**श्रीमद्भागवतं शास्त्रं सद्ग्रन्थः सत्यबोधकः।**
**आदावन्ते च मध्ये च सत्यमेवात्र गीयते।।**
**सत्ये मतिर्गतिः सत्ये सत्ये मे सुस्थिरं मनः।**
**चित्तं मे रमतां सत्ये सत्यधर्माय दृष्टये।।**

........................ क्रमशः

।। शुभमस्तु नित्यम्।।

**- संस्थापकः, पं. मालीरामदाधीचस्मृति-संस्कृतसेवाशोधसंस्थानम्, छापर (चूरू)**

# नूतनकाव्यपृषताः

❑ डॉ.हर्षदेवमाधवः

## दुःखानि

दुःखानि पतन्ति मनुष्येषु
यथा पतन्ति जलप्रपाताः
पर्वतशिखरेषु।
दुःखानां सन्ति वात्यासाराः,
दुःखानां भवन्ति दावानलाः
सुखप्रदेशेषु।
दुःखानि प्ररोहन्ति हृदयेषु
नेत्रजलेन।
दुःखानि वृष्टिकालेऽपि
आनयन्ति दुर्भिक्षकालं
स्वप्नानाम्।
दुःखानि ससुखं वसन्ति
महालयेष्वपि।
मारुतो न शोषयति दुःखानि,
न छिन्दन्ति तानि शस्त्राणि।
दुःखानि सप्तसमुद्रान् पारं कृत्वापि
प्रविशति हृदयम्।
दुःखानि पातालं भित्त्वा
प्रादुर्भवन्ति सहसा।
दुःखानि गच्छन्ति गृहाद् गृहम्
अतिथिरूपेण,
दुःखानि सुखेभ्य ईर्ष्यन्ति,
अनुरागेभ्यो दुह्यन्ति,
आनन्देभ्यः क्रुध्यन्ति
तथापि
निश्चला ते वीराः, महारथिनः।
किन्तु
ये दुःखेभ्यः पलायन्ते,
ते सन्ति कातराः।
ये दुःखेभ्यः श्रान्ता भूत्वा
स्वात्मघातं कुर्वन्ति
ते सन्ति कापुरुषाः।
ये दुःखानि दृष्ट्वा रुदन्ति
ते सन्ति जीवन्मृताः।
अतो हि
वयं खादामो दुःखानि रोटिकाभिः।
वयं पिबामो दुःखानि जलेन।
वयं हन्मो दुःखानि शत्रुभिः।
वयं दुःखानि पारं कृत्वा गच्छामः जीवनमार्गम्।
अधुना
अन्नवद् दुःखानि सुपाच्यानि।
अस्माभिः
स्वयमेव निर्मिताः
दुःखविषाणूनां प्रतिकारार्थं
नवाः सुखकोषाः।
पतन्तु... वर्षन्तु...
प्ररोहन्तु तानि
यथाबलम्।
अनिर्वचनीये म आनन्दसाम्राज्ये
निवसन्ति
कतिपयानि दुःखानि पामराणि
किन्तु
सम्राजि
रङ्केभ्य आश्रयं दातुम्
औदार्यं
भवेदेव।

## त्वमेवासि

अलकनन्दे!
त्वं समीपं भवसि
तदा सामीप्यमात्मीयं भवति।
त्वं दूरे भवसि
तदा त्वदुपस्थितिसौरभं
परिमलायते सर्वत्र।
त्वं पार्श्वे भवसि
तदा
कालावरणं क्षरति।
त्वं पृष्ठे वर्तसे
तदा
गगनं सुवर्णातपं धृत्वा तिष्ठति।
त्वं पुरतो दृश्यसे
तदा
वृद्धगात्रं त्यक्त्वा
मनो वृष्टिरोमाञ्चमनुभवति।
त्वं स्मर्यसे
तदा
समृद्धिर्भवति साम्राज्यस्य।
त्वमेवासि
यया जीवितफलं प्राप्नोम्यहम्।

**सङ्केतम्**
८, राजतिलकबंगलोज़, ममता हॉस्पिटल
के सामने, आबादनगर बस स्टॉप समीप,
बोपल, अहमदाबाद-३८००५८,
मो. ९८२७६ २४५१६, ७८७४५ ३२२२५



# प्रो. ताराशंकरशर्मा 'पाण्डेयः'

## कुलपतित्वेन नियुक्तः

राजस्थानस्य राजधान्यां पाटलपत्तननाम्ना सुप्रथिते जयपुर-नगरे राष्ट्रपतिसम्मानितविदुषां पं. श्री मोहनलालपाण्डेयानां सुपुत्रत्वेन लब्धजन्मा सुप्रसिद्धः साहित्यमनीषी, प्रौढः कविः, लेखकः, समीक्षकः सम्पादकश्च प्रो. ताराशङ्करशर्मा 'पाण्डेयः' श्रीकल्लाजी वैदिकविश्वविद्यालय, निम्बाहेड़ा, चित्तौड़, राजस्थानस्य प्रेसिडेण्ट(कुलपति)रूपेण नियुक्त इति हर्षप्रकर्षविषयः। महोदयेन 9 जुलाई 2022 दिनांके कार्यारम्भः कृतः। श्रीशर्मा जगद्गुरु-रामानन्दाचार्य-राजस्थानसंस्कृत-विश्वविद्यालये प्रोफेसर पदे स्वामूल्यं सेवां प्रदाय 2017 तमे वर्षे सेवानिवृत्तः।

राजस्थानसंस्कृतअकादमी - माघमहोत्सवे पं. पुष्करदत्तशर्मस्मृति-प्रथम-'प्रज्ञा-अलङ्करण'-सम्मानेन विभूषितः प्रो.शर्मा राजस्थानसर्वकारेण संस्कृतदिवस-समारोहावसरे राज्यस्तरीयसंस्कृत-विद्वत्सम्मानेनापि सभाजितो वर्तते। राजस्थानसंस्कृत-अकादमी-द्वारा सांस्कृतिक-आदान-प्रदान-सन्दर्भे संस्कृतविद्वद्दलेन सह मॉरीशसदेशस्य यात्रां कृतवान् पाण्डेयमहोदयः मुद्राराक्षस-संस्कृतचलचित्रस्य संवादलेखकरूपेणापि प्रसिद्धिं प्राप्नोत्। भवतः कुलपतित्वमधिगम्य श्रीकल्लाजी वैदिकविश्वविद्यालयो नूनं परां ख्यातिं गमिष्यतीति दृढविश्वासं धारयन् समभिनन्दति महोदयं भारतीपत्रिकापरिवारः।

**- सुदामा शर्मा, प्रबन्धसम्पादकः**

# पदप्रहेलिका - २

❑ मधुसूदनशर्मा ( प्राध्यापकः )

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| 1 | | 2 | | ■ | 3 | | 4 | |
| | ■ | | ■ | | | ■ | | ■ |
| ■ | 6 | | 7 | ■ | ■ | 8 | | 9 |
| 10 | | ■ | 11 | | 12 | ■ | ■ | |
| | ■ | 13 | | ■ | | ■ | 14 | |
| 15 | | | ■ | ■ | 16 | 17 | | ■ |
| | ■ | ■ | 18 | | ■ | | ■ | 19 |
| ■ | 20 | | | ■ | 21 | | 22 | |
| 23 | | ■ | 24 | | | ■ | | ■ |

**वामतः दक्षिणम् -**

1. गणेशः, गजाननः (4)
3. वृत्तिः, जीवननिर्वाहस्य साधनम् (4)
5. चिकित्सकः (2)
6. सेनापतिः, कार्तिकेयः (3)
8. नाट्यशास्त्रस्य प्रणेता मुनि (विसर्गरहितः)(3)
10. पार्वती, दुर्गा (2)
11. जिह्वा, रसज्ञा (3)
13. रोगः, आमयः (2)
14. समूहः, सङ्ग्रहः (2)
15. आम्रः, वृक्षविशेषः (3)
16. पटुः, दक्षः (3)
18. वक्षःस्थलम् (2)
20. राजा, नृपतिः (विसर्गरहितः) (3)
21. भद्रम्, कल्याणम् (4)
23. समयः, यमः (2)
24. ब्रह्मणः दशसु मानसपुत्रेषु अन्यतमोऽयं प्रसिद्धः देवर्षिः विष्णुभक्तश्च (3)

**उपरिष्टात् अधः -**

1. ब्राह्मणः, द्विजाति (2)
2. कालिन्दी, नदी विशेषः (3)
3. प्रथमः, आदिः (2)
4. भ्रमणम्, बौद्धमठः (विसर्गरहितः) (2)
6. परिचर्या (2)
7. समुद्रः, जलधिः (3)
9. पुत्रः, सुतः (3)
10. शृङ्गम्, कूटः (4)
12. लौहनिर्मितः बाणः (विसर्गरहितः) (3)
13. सर्पः, दुष्टः (2)
14. जङ्गमः, चलः (2)
17. अश्वः, घोटकः (विसर्गरहितः) (3)
18. शुक्रः, भार्गवः (3)
19. स्वर्गार्थकस्य द्योशब्दस्य द्वितीयैकवचनरूपम्(2)
20. 'नैषधचरितम्'इत्यस्य महाकाव्यस्य नायकः (2)
21. दर्पः अहङ्कारः (2)
22. कलङ्कः, लाञ्छनम् (2)

**पदप्रहेलिकायाः पूरणाय अवधातव्याः अंशाः -**

- लेखितव्य-पदस्य लेखनाय अपेक्षितखण्डानां संख्या कोष्ठके लिखिता अस्ति। निर्दिष्टसंख्याकेषु खण्डेषु एव तत् पदं लेखनीयम्।
- एकस्मिन् खण्डे एकः एव वर्णः लेख्यः। स्वतन्त्रः स्वरः, व्यञ्जनसहितः स्वरः वा वर्णः ज्ञेयः। कस्माच्चित् वर्णात् पूर्वं स्थितः स्वररहितः व्यञ्जनवर्णः तेन सह एव समानखण्डे लेखितव्यः। यथा-

| स | र | स्व | ती |
|---|---|---|---|

| अ | ङ्कः |
|---|---|

- पदान्ते स्थितः व्यञ्जनवर्णः तु भिन्नखण्डे एव लेखनीयः। यथा -

| मु | ख | म् |
|---|---|---|

| ज | ग | त् |
|---|---|---|

प्रहेलिकां पूरयित्वा sanskritbharti09@gmail.com इत्यत्र प्रेष्यताम्। समीचीनोत्तरं प्रेषितवतां नामानि अग्रिमे अङ्के प्रकाशयिष्यन्ते।

पुस्तक-समीक्षा

# विज्ञानकथां प्रस्तुवन्नुपन्यासः

❑ महामहोपाध्यायदेवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

अन्तरिक्षयानेन विभिन्नग्रहोपग्रहाणां यात्रा न साम्प्रतमकल्पनीया घटना। भारतीयैरपि कल्पना चावला – राकेशशर्मप्रभृतिभिरन्तरिक्षयात्रा कृताऽस्तीति विदन्त्येव भारतवासिनः। एवंविधानां यात्राणां वर्णनं पाठकानां कृते कियद्वर्णनीयं भवेदिति सहजमनुमानम्। सुप्रथितेन संस्कृत-साहित्यस्य युवकथाकारेण डॉ.ऋषिराजजानीवर्येण तादृश एवैकः संस्कृतोपन्यासः प्रणीतोऽस्ति यः सपद्येव **'अन्तरिक्षयोधाः'** शीर्षकेण सह प्रकाशितोऽस्ति। भविष्यत्कालिकघटनारूपेण परिकल्पिताऽस्ति सेयमन्तरिक्षयात्रा। डॉ. विक्रम-राकेश-सुनीता प्रभृति वैज्ञानिकैः सह बोधायननामको यन्त्रमानवः (रोबोट) अन्तरिक्षयात्रिरूपेण वर्णितोऽत्र। भारते खलु पूर्वमपि भरद्वाजप्रभृतिभिर्यानविद्या वर्णिताऽभूत्, आर्यभटादिभिरन्तरिक्षीया ग्रहा वर्णिता अभूवन्। नालन्दाप्रभृतिक्षेत्रेषु विज्ञानशिक्षा प्रदीयते स्म।

भविष्यत्काले तादृशानामन्तरिक्षयात्रिणां विज्ञानयात्राया वर्णनाय सप्तसु खण्डेषु विभक्तोऽयमुपन्यासः प्राचीनभारतीयविज्ञान-समृद्धिमपि वर्णयति, ग्रेमूला नामकस्यापरिचितस्य ग्रहस्यैकस्य सृष्टिमपि सूचयति, कौमुदीमहोत्सवमपि वर्णयति। प्रथमः खण्डः अशक्यमभियानम्, द्वितीयः सूर्यस्य महाताण्डवम्, तृतीयः महामृत्योर्मुखे, चतुर्थः सप्तर्षिसंस्थानम्, पञ्चमः ग्रेमूला एका विचित्रा सृष्टिः, षष्ठः नालन्दायाः प्रभ्रष्टानि पृष्ठानि, सप्तमश्च ब्रह्माण्डस्य पर्यन्तः अर्थात् गृहम् इति शीर्षकं वहति।

संस्कृतोपन्यासेन सहैव एतस्य हिन्द्यनुवादोऽपि मुद्रितोऽस्ति संस्कृतोपन्यासानन्तरं तस्मिन्नेव ग्रन्थे। **'अन्तरिक्ष के योद्धा'** शीर्षकोऽयं हिन्द्यनुवादः प्रो. डॉ. गिरीशचन्द्रपन्तेन प्रणीतोऽस्ति। अत्रापि सप्तानां खण्डानां यथायथमनुवादः प्रस्तुतोऽस्ति येन सर्वविधानां पाठकानां सौकर्यं भवेत्। प्रारम्भे श्रीपरमानन्दझावर्याणां शुभाशंसा संस्कृते मुद्रिताऽस्ति, पर्यन्ते च मुख्यपृष्ठे विद्वत्प्रवरस्य डॉ.राधावल्लभ-त्रिपाठिवर्य्यस्याभिमतं मुद्रितमस्ति हिन्दीभाषायाम्।

विज्ञानकथायाः सर्वथा नूतनोऽयं प्रयोगः संस्कृते नूतनं पाठ्यवस्तु प्रस्तौतीति संस्कृतजगति सर्वात्मना स्वागतमस्य विधास्यते इति निश्चप्रचम्। वर्धाप्यते साभिनन्दनं युवा कथाकारः डॉ.ऋषिराज जानी नूतनस्यास्य प्रयोगस्य कृते।

**अन्तरिक्षयोधाः (संस्कृतोपन्यासः)** प्रणेता डॉ.ऋषिराज जानी, अनुवादकः सम्पादकश्च प्रो.डॉ.गिरीशचन्द्रपन्तः, प्रकाशकः परिमल पब्लिकेशन्स 17-18, शक्तिनगर, दिल्ली-7, पृ.सं. 260, मूल्यम् 400/-

# कवितापत्रिका पद्यबन्धा

केवलं पद्यबद्धरचना प्रकाशनपराणां पत्रिकाणां परम्परा प्रचलति संस्कृते बहोः कालात्। तामेव परम्परां प्रतिनिदधाति भोपालतो वीणापाणि संस्कृतसमित्या प्रकाश्यमाना पत्रिका 'पद्यबन्धा'। संस्कृतकवितापत्रिकायामस्यां नवीनेष्वङ्केषु छन्दोमुक्तपद्यबन्धानामपि प्रकाशनं न भवेत् प्रतिबन्धितमिति स्वाभाविकमेव। अस्याः पत्रिकायाः नूतनतमे 19 तमे स्पन्दे छन्दोबन्धाः, गीतिबन्धाः मुक्तछन्दोबन्धाः, अनूदितबन्धाः, बालगीतिबन्धाश्च प्रकाशिता अवलोक्येरन् पाठकैः। अर्धवार्षिकी सेयं पत्रिका।

अस्याः सम्पादकीयमपि पद्यबद्धं स्यादिति स्वाभाविकमेव। भारतस्य सुप्रथिता विद्वांसः संस्कृतकविता-पत्रिकाया अस्याः संरक्षणसमितेः, परामर्शदातृसमितेश्च सदस्यत्वेन प्रत्यङ्कं सूचिता भवन्ति। नवीनतमेऽस्मिन्नङ्के डॉ. राधावल्लभ त्रिपाठिवर्यस्य, व्रजकिशोरत्रिपाठिवर्यस्य अन्येषां च पद्यरचनाः सन्ति, अनेकानि शतकानि सन्ति, कविवर्यस्य प्रो. अभिराज- राजेन्द्रमिश्रस्य गीतिः, डॉ. हर्षदेवमाधवस्य छन्दोमुक्तरचनाः, प्रीतिपुजारावर्याया बालगीतयः, अन्याश्च विविधा रचना वैविध्यं प्रदर्शयन्ति। गते कालखण्डे विश्वजनीन-कोरोना महामार्याः प्रकोपो भारतेऽपि महतीं विभीषिकां प्रकटयामास। पत्रिकयाऽनया कोरोना-महामारी-विषयिणीनां रचनानां विशेषाङ्कः **सप्तदश**स्पन्दरूपेण प्रकाशितोऽभूत्, अस्मिन्नेकोनविंशे स्पन्देऽपि अनेका रचनाः कोरोनामहामारीं वर्णयन्ति। कोरोनाशतकमत्र प्रकाशितमस्ति। डॉ. बनमाली विश्वासवर्यस्य दीपावलीशतकमपि प्रकाशितमस्ति। कवेरस्य **'केदारायणं'** काव्यं पञ्चकेदारमाहात्म्यपरकं पञ्चखण्डात्मकं पञ्चशतकोपेतमस्याः पत्रिकाया अष्टादशे स्पन्दे प्रकाशितमभूत्।

**पद्यबन्धा** (समकालिकसंस्कृतकविता पत्रिका), **प्रधानसम्पादकः** डॉ. बनमाली विश्वासः, **सम्पादकः** डॉ. धर्मेन्द्रकुमारसिंहदेवः, **प्रकाशिका** वीणापाणिसंस्कृत-समितिः, भोपालम्, प्रत्यङ्कम् **मूल्यम्** 50/-, वार्षिकग्राहकताशुल्कम् 100/-, आजीवनम् 2500/-, सङ्केतः एल145, एबीडीएल पैराडाइज, लहारपुर, भोपाल-462083 (मध्यप्रदेशः)


**ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-**

भारती पत्रिका का वार्षिक शुल्क रुपये 150/-, पंचवर्षीय शुल्क 700/-, आजीवन सदस्यता (15 वर्ष) शुल्क 2100/- मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई-मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम – **भारतीयसंस्कृतप्रचारसंस्थान**

खाता संख्या – **2139101912498**

**IFS Code - CNRB0002139**

नारी-स्तम्भः

# न रत्नमन्विष्यति मृग्यते हि तत्

❑ डॉ. राजेश्वरी भट्ट

18 जुलाई 2022 तमे वर्षे पञ्चदशतमस्य राष्ट्रपतिपदस्य कृते सम्पन्ने जाते मतदानमहोत्सवे राष्ट्रियजनतान्त्रिक-गठबन्धनस्य प्रत्याशिनी द्रौपदीमुर्मू विजयमधिगम्य राष्ट्रे नवेतिहासं व्यरचयत्। जाति, वंश, वर्ण, वर्गादिभिर्निरपेक्षे निष्पक्षे च अस्मिन् मतदानकार्यक्रमे राष्ट्रपतिपदस्य कृते आदिवासिवर्गस्य प्रथम-महिलाया भव्यो विजयः न केवलं नारीणां कृते गौरवस्य विषयोऽस्ति अपितु विश्वस्मिन् विश्वे भारतदेशस्य जनतान्त्रिकव्यवस्थायाः, समतायाः, उदारतायाः किमधिकं भारतीयसंस्कृतेः श्रेष्ठतायाः प्रत्यक्षं प्रमाणं वर्तते।

अस्मिन् मतदानपरिणामे द्रौपदी मुर्मू विपक्षस्य प्रत्याशिनं पूर्वकेन्द्रियमन्त्रिणं यशवन्त सिन्हामहाभागं बहुमतेन पराजित्य स्वतन्त्रराष्ट्रे प्रथमा आदिवासी महिला राष्ट्रपतिः जाता। राष्ट्रकर्णधारैरुटजात्प्रासादे शिखरे वा प्रतिष्ठापिता विजयिनी, गुणानां खनित्री द्रौपदी मुर्मू 20 जून 1958 तमे वर्षे 'ओडिशा' राज्ये मयूरभंजे उदापोसीग्रामे अनुसूचित-जनजातिवर्गे संथाल परिवारे जनिमलभत।

द्रौपदीमुर्मू महाभागाया बाल्यावस्था अभावेषु संघर्षेष्वेव व्यतीता। अस्याः प्रारम्भिकी शिक्षाऽपि ग्रामस्य सामान्ये विद्यालये सम्पन्ना जाता। तत उच्चाध्ययनाय साग्रहिला द्रौपदीमुर्मू भुवनेश्वरस्थिते विश्वविद्यालयतः स्नातक परीक्षां उत्तीर्णवती। द्रौपदी महाभागायाः प्राथमिक जीवनं संघर्षदोलायां दोलायामानं पातोत्पातात्मकञ्चासीत्। द्रौपद्याः पतिः श्यामचरण मुर्मू स्थानीये अधिकोषे कार्यालये कार्यरत आसीत्। गृहे द्वौ पुत्रौ पुत्री दम्पती च इति पञ्चसदस्यानां परिवारो बाधाग्रस्तोऽपि यथाकथञ्चित् जीवनयात्रायां प्रवर्तमान आसीत्। अल्पान्तरालेनैव एकैकं कृत्वा द्रौपदी महाभागाया प्राणाधारः पतिः सशक्तौ भुजाविव समर्थावुभौ पुत्रौ च दिवं प्रयातौ। किन्तु धन्यास्ति क्ष्मेव क्षमाशीला द्रौपदीमुर्मू या वज्रेण समं दारुणदुःखं सहमानाऽपि विवेकसूत्रं दृढेन धारयित्वा पुत्र्याः जीवननिर्माणाय स्वयं च समाजे शिर उत्थाय व्यवस्थिता जाता।

1979 तमे द्रौपदीमुर्मू विद्युद्विभागे कनिष्ठ-सहायकरूपेण कार्यं कृतवती किन्तु शिक्षाक्षेत्रे आत्मनोऽधिकं रुचिमपेक्ष्य शिक्षणकार्ये समर्पिता जाता। अस्मिन् अन्तराले द्रौपदी महाभागाया निष्पक्ष-कार्यशैली, कर्मनिष्ठा, श्रमशीलता, उदारतादिभिः, गुणैरभिभूता प्रबुद्धा नागरिकाः समाजस्य हितमपेक्ष्य इमां राजनीतिक्षेत्रे पदं कर्त्तुं प्रेरितवन्तः। ततः प्रभृति बहुमुखी प्रतिभासम्पन्ना 'द्रौपदीमुर्मू' राजनीतिक्षेत्रे प्रविष्टा जाता। 1997 तमे वर्षे, द्रौपदीमुर्मू नागरिकाणां समर्थनेन स्थानीयपार्षद- पदस्य कृते विजयमधिगतवती।

2000 तमे वर्षे द्रौपदीमुर्मू ओडिशा सर्वकारे राज्यमन्त्री पदे अलंकृता जाता। ततो द्विवर्षपर्यन्तं इयं भारतीय जनतापार्टीसर्वकारे वाणिज्य एवं परिवहनमन्त्री पदं व्यभूषयत्। मन्त्रीपदे स्थिता द्रौपदीमुर्मू आत्मनः कर्मनिष्ठया च, 2007 तमे वर्षे सर्वश्रेष्ठ विधायकरूपेण नीलकंठपुरस्कारेण सम्मानिता जाता। श्रुतकीर्तिः, सदाशया द्रौपदीमुर्मू 2013 तमे वर्षे मयूरभंजे दलस्य जिलाध्यक्षपदे प्रतिष्ठापिता बहुमुखी प्रतिभासम्पन्ना, दलितोद्धारिका, समदृष्टिसम्पन्ना, राष्ट्राय समर्पिता, नारीहितरक्षिका 'द्रोपदीमुर्मू' 2015 तमे वर्षे झारखण्डराज्यस्य राज्यपालपदे प्रतिष्ठापिता। अत्युच्चपदे स्थिताऽपि द्रौपदीमुर्मू मानवीयगुणैः पूर्णतः भूषिताऽस्ति। कानिचिद्दिनानि पूर्वं 'द्रौपदीमुर्मू' एकस्मिन् देवालये दर्शनाय गतवती, तत्र स्वच्छताया अभावं दृष्ट्वा इयं स्वयमेव स्वच्छताकार्ये प्रवृत्ता जाता।

अहंकाररहिता लोभात् पराङ्मुखी दौपदीमुर्मू ग्रामे विद्यालयविकासाय नैजिकीं भूमिं प्रदत्तवती। आत्मनो दूरदर्शिता, कार्यकुशलता न्यायप्रियतादिभिर्गुणैःषड्वर्ष पर्यन्तं द्रौपदी प्रथमा आदिवासी महिलारूपेण-राज्यपालपदे स्थिता जाता। पञ्चविंशतिवर्षाणि पर्यन्तं राजनीतिक्षेत्रे द्रौपदीमुर्मू महाभागाया दलं प्रति निष्ठा कर्मठता, निष्पक्षतादिभिः अनन्यसामान्यैर्गुणैरभिभूतेन प्रधानमंत्रि-नरेन्द्रमोदिमहोदयेन राष्ट्रस्य हितमपेक्ष्य राष्ट्रपतिपदस्य कृते प्रस्तावितेषु विंशति विभूतिषुद्रौपदीमुर्मू रूपेण अमूल्यं रत्नमन्वेषितम्।

## हिन्दी अनुवाद

22 जुलाई 2022 ई को भारत के पन्द्रहवें राष्ट्रपति पद के लिए सम्पन्न मतदान महोत्सव में राष्ट्रिय जनतान्त्रिक गठबन्धन की ओर से प्रत्याशिनी 'द्रौपदी मुर्मू' ने विजयश्री प्राप्त कर राष्ट्र में नव इतिहास रच दिया। जाति, वंश, वर्ण, वर्ग आदि से निरपेक्ष एवं निष्पक्ष इस चुनाव कार्यक्रम में राष्ट्रपति पद के लिए आदिवासी वर्ग की महिला की शानदार विजय न केवल नारी जाति का गौरव बढ़ाती है अपितु समस्त विश्व में भारतदेश की जनतान्त्रिक व्यवस्था, समता, उदारता एवं श्रेष्ठता का प्रत्यक्ष प्रमाण है। इस मतदान परिणाम में 'द्रौपदी मुर्मू' विपक्ष के प्रत्याशी यशवन्त सिन्हा महोदय को बहुमत से पराजित कर स्वतंत्र राष्ट्र की प्रथम आदिवासी महिला राष्ट्रपति बनीं।

राष्ट्र के कर्णधारों के द्वारा झोंपड़ी से महल अथवा शून्य से शिखर पर प्रतिष्ठापिता, विजयिनी एवं गुणों की खान 'द्रौपदी मुर्मू' ने 20 जून 1958 को 'ओडिशा' राज्य के मयूरभंज जिले में **उदापोसी** गांव में अनुसूचित जनजाति वर्ग में संथाल परिवार में जन्म ग्रहण किया। द्रौपदी मुर्मू की बाल्यावस्था अभावों एवं संघर्षों में ही व्यतीत हुई। इनकी प्रारम्भिक शिक्षा गांव के सामान्य विद्यालय में ही सम्पन्न हुई। तत्पश्चात् उच्चाध्ययन के लिए कटिबद्ध द्रौपदी मुर्मू ने स्नातक परीक्षा 'भुवनेश्वर' स्थित विश्वविद्यालय से उत्तीर्ण की। 'द्रौपदी मुर्मू' महोदया का प्रारम्भिक जीवन संघर्षपूर्ण

एवं पातोत्पातात्मक था। द्रौपदी मुर्मू के पति श्यामा चरण मुर्मू एक स्थानीय बैंक में कार्यरत थे। घर में दम्पती, दो पुत्र, एक पुत्री इन पाँच सदस्यों का परिवार किसी तरह अपनी जीवन यात्रा चला रहा था। किन्तु कुछ ही समय में एक-एक करके द्रौपदी के प्राणाधार पति श्यामाचरण मुर्मू एवं दो सशक्त भुजाओं के समान दो समर्थ पुत्र भी स्वर्गवासी हो गए। किन्तु धन्य है पृथ्वी के समान क्षमाशीला 'द्रौपदी मुर्मू' जिन्होंने वज्र के समान दारुण दुःख को सहते हुए भी विवेक सूत्र को दृढ़ता से धारण करते हुए पुत्री के जीवन निर्माण एवं अपने आत्मसम्मान की रक्षा करने के लिए सिर उठाकर अपने को व्यवस्थित किया।

1979 ई. में द्रौपदी मुर्मू ने विद्युत् विभाग में कनिष्ठ सहायक के रूप में कार्य किया। किन्तु शिक्षाक्षेत्र के प्रति अधिक रुचि होने के कारण द्रौपदी मुर्मू शिक्षण कार्य में संलग्न हो गई। इसी अन्तराल में 'द्रौपदी मुर्मू' की निष्पक्ष कार्यशैली, कर्मनिष्ठा, श्रमशीलता, उदारता आदि गुणों से अभिभूत प्रबुद्ध नागरिकों ने समाज हित के लिए द्रौपदी मुर्मू को राजनीति क्षेत्र में प्रवेश करने के लिए प्रेरित किया। तभी से बहुमुखी प्रतिभा सम्पन्ना द्रौपदी मुर्मू पूर्णतः राजनीति क्षेत्र में प्रविष्ट हुई। प्रथम बार 1997 ई. में नागरिकों के समर्थन से स्थानीय पार्षद पद के लिए विजयिनी बनी। 2000 ई. में 'द्रौपदी मुर्मू' ओडिशा सरकार में राज्य मंत्री पद पर अलंकृत हुई। इसके पश्चात् दो वर्ष पर्यन्त 'द्रौपदी मुर्मू' भारतीय जनता पार्टी सरकार में वाणिज्य एवं परिवहन मंत्री पद पर सुशोभित की गई। मन्त्री पद पर स्थित द्रौपदी मुर्मू अपनी कर्मनिष्ठा से 2007 ई. में सर्वश्रेष्ठ विधायक के रूप में '**नीलकंठ पुरस्कार**' से सम्मानित की गई। कीर्तिमती एवं उदारमना द्रौपदी मुर्मू 2013 ई. में मयूरभंज जिले में दल की अध्यक्ष पद पर प्रतिष्ठापित की गई। बहुमुखी प्रतिभासम्पन्ना, दलितोद्धारिका, समदृष्टिसम्पन्ना राष्ट्र के लिए समर्पित, नारी हितरक्षिका द्रौपदी मुर्मू 2015 ई. में झारखण्ड राज्य की प्रथम महिला (आदिवासी) राज्यपाल के पद पर प्रतिष्ठापित हुई। अत्युच्च पद पर आसीन होने पर भी द्रौपदी मुर्मू मानवीय गुणों से पूर्णतः विभूषित है। कुछ दिन पूर्व 'द्रौपदी मुर्मू' एक मन्दिर में दर्शन के लिए गईं थीं। वहां स्वच्छता का अभाव देखकर स्वयं स्वच्छता कार्य में प्रवृत्त हो गई।

अहंकार शून्य, लोभ से पराङ्मुखी 'द्रौपदी मुर्मू' ने ग्रामीण विद्यालय के विकास के लिए अपनी निजी सम्पत्ति (भूमि) दान कर दी। अपनी दूरदर्शिता, कार्यकुशलता, न्यायनिष्ठा आदि गुणों से द्रौपदी मुर्मू ने प्रथम आदिवासी महिला राज्यपाल के रूप में निरन्तर 6 वर्षों तक राज्य की बागडोर शान से सम्भाली। राजनीति में द्रौपदी मुर्मू की अपने दल के प्रति निष्ठा, कर्मकुशलता, निष्पक्षता आदि गुणों से अभिभूत राष्ट्र के **प्रधानमंत्री नरेन्द्र मोदी** महोदय ने राष्ट्रपति पद के लिए प्रस्तावित बीस विभूतियों में राष्ट्र के विकास के लिए द्रौपदी मुर्मू जैसे अमूल्य रत्न को ही खोज लिया।

**- पूर्व-संस्कृतविभागाध्यक्षा,**
**लालबहादुर-शास्त्री कॉलेज, जयपुर।**

आयुर्वेद-स्तम्भः

# वर्षर्तौ हितसेवनमहितस्य च वर्जनम्

❑ प्रो. बनवारीलालगौडः
राष्ट्रपतिसम्मानितः, पूर्व-कुलपतिः

**आयुर्वेदे संवत्सरं षडङ्गमृतुविभागेन विहितम्। तत्रादित्यस्योदगयनमादानं च त्रीनृतूञ्छिशिरादीन् ग्रीष्मान्तान् व्यवस्येत्, वर्षादीन् पुनर्हेमन्तान्तान् दक्षिणायनं विसर्गं च। चरकसंहितायां सूत्रस्थानस्य मात्राशितीयेऽध्याये मात्रावदाहारस्य बलादिहेतुत्वं प्रतिपादितं, तच्च ऋतुसात्म्यमपेक्ष्य कृतस्याहारस्य भवति। ऋतुविशेषवशाच्चाहारविहारसेवनप्रतिपादनार्थमृतुचर्यायाः वर्णनमग्रिमेऽध्याये विस्तरेण कृतम्। यतोहि पूर्वाध्याये दैनन्दिनो विहार उक्तः, तत्पश्चात्तु ऋतूनधिकृत्य विहारस्याहारस्य च विधिपूर्वकं वर्णनं कृतम्। वाग्भटेनाष्टाङ्गहृदये षण्णामृतूनां मासानुरूपि वर्णनं प्रतिपादितम्, यथा-**

**मासैर्द्विसंख्यैर्माघाद्यैः क्रमात् षड्तवः स्मृताः।**
**शिशिरोऽथ वसन्तश्च ग्रीष्मो वर्षाशरद्धिमाः॥**
(अ.हृ.सू.3/1)

आयुर्वेद में संवत्सर (वर्ष) छः अङ्ग वाले ऋतुविभाग द्वारा कहा गया है। सूर्य की उत्तर दिशा में गति होने पर इसे आदान काल कहा गया है, यह शिशिर से लेकर ग्रीष्म तक तीन ऋतुओं में विभाजित है। वर्षा से आरम्भ करके हेमन्त तक की तीन ऋतुओं को विसर्गकाल कहते हैं। इनमें सूर्य की गति दक्षिण दिशा की ओर होती है। चरकसंहिता में सूत्रस्थान के मात्राशितीय अध्याय में यह प्रतिपादित किया गया है कि मात्रापूर्वक आहार के प्रयोग से बल आदि प्राप्त होते हैं। यह ऋतुसात्म्य की अपेक्षा के अनुसार किये गये आहार द्वारा होता है। ऋतुविशेष के अनुसार आहार-विहार के सेवन का प्रतिपादन करने के लिए ऋतुचर्या का वर्णन अग्रिम तस्याशितीय अध्याय में विस्तार से किया गया है। क्योंकि पूर्व अध्याय में दैनन्दिन विहार बताया गया है। इसके पश्चात् ऋतु के अनुसार आहार और विहार का विधिपूर्वक वर्णन किया गया है। वाग्भट द्वारा अष्टाङ्गहृदय में छः ऋतुओं का मासानुरूप वर्णन प्रतिपादन किया गया है, यथा- माघ आदि दो-दो माह द्वारा क्रम से शिशिर, वसन्त, ग्रीष्म, वर्षा, शरद् और हेमन्त छः ऋतुयें होती हैं।

**वर्तमानकाले प्राचीनकालेऽपि च केचिद्विद्वांसः चातुर्मासिकमृतुं कृत्वा शीतोष्णवृष्टिलक्षणान् हेमन्तग्रीष्मवर्षाख्यांस्त्रीनृतूनिच्छन्ति। अपरे तु द्विमासिकान् शिशिरवसन्तग्रीष्मवर्षाशरद्धेमन्त-लक्षणान् षड्तूनिति। वाग्भटेन द्विसंख्यात्मकैर्मासैः विभागो विहितः, तत्र माघ आद्यो येषां फाल्गुनादीनां तेषां द्विसंख्यात्मकानां मासानां विभाजनं विहितम्। तैर्द्विसंख्यैर्माघाद्यैर्मासैः क्रमात् षड्तवः स्मृताः। शिशिराद्याः षड्तवः शिशिरवसन्तग्रीष्मवर्षा-शरद्धेमन्ता इति। तैस्तु ऋतुभिस्त्रिभिः शिशिरादि-भिरुत्तरायणं जानीयात्। अयनमुत्तरं-सवितुरुत्तर-मार्गप्रतिपत्तिः, उत्तरायणम् आदानं जानीयात्। आदानमिति चान्वर्थं नाम इति प्रतिपादयति। तदा-तस्मिन् काले, नृणामन्वहमादित्यो बलमादत्ते।**

वर्तमान काल में और प्राचीन काल में भी कुछ विद्वान् चार माह की ऋतु मानकर शीत, उष्ण, वृष्टि लक्षण वाली हेमन्त, ग्रीष्म, वर्षा नामक तीन ऋतुयें मानते हैं। दूसरे विद्वान् दो-दो माह वाली शिशिर, वसन्त, ग्रीष्म,

वर्षा, शरद्, हेमन्त लक्षण वाली छः ऋतुयें मानते हैं। वाग्भट द्वारा ऋतुओं का दो-दो माह का विभाग विहित है। माघ से आरम्भ करके दो-दो माह की ऋतुओं का विभाजन विहित है। उन माघ आदि दो-दो माह द्वारा क्रमशः छः ऋतुयें होती हैं। शिशिर आदि छः ऋतुयें शिशिर, वसन्त, ग्रीष्म, वर्षा, शरद्, हेमन्त होती हैं। उन शिशिर आदि तीन ऋतुओं को उत्तरायण जाना जाता है। उत्तरायण में सूर्य की उत्तरमार्ग में गति होती है, इसलिए इसे उत्तरायण या आदानकाल जाना जाता है। इसका दूसरा नाम आदान प्रतिपादित किया गया है। इस आदान काल में सूर्य मनुष्यों के बल को खींच लेता है।

**तत्र माघफाल्गुनौ-शिशिरः, चैत्रवैशाखौ-वसन्तः, ज्येष्ठाषाढौ-ग्रीष्मः, श्रावणभाद्रपदौ-वर्षाः, आश्विनकार्तिकौ-शरत्, मार्गशीर्षपौषौ-हेमन्तः। ननु सुश्रुतेन भाद्रपदाद्यैर्वर्षादय ऋतव उक्ताः। तत्तु संशोधनमधिकृत्य विहितम्। ज्योतिःशास्त्रमधिकृत्य यद्विभाजनमृतूनां विहितं तत्तु सर्वोत्कृष्टम्। तत्र तु न हि फाल्गुनचैत्रौ-वसन्तः नापि चैत्रवैशाखौ। किन्तु मीनमेषौ। यदा फाल्गुनादौ मीनसङ्क्रान्तिस्तदा फाल्गुनचैत्रौ-वसन्तः, यदा तु फाल्गुनान्ते तदा चैत्रवैशाखौ। एवं वृषमिथुनौ-ग्रीष्मः, कर्कटसिंहौ-वर्षाः, कन्यातुले-शरत्, वृश्चिकधनुषी-हेमन्तः, मकरकुम्भौ-शिशिरः, इति। उक्तं च ज्योतिःशास्त्रे-**

**'मृगादिराशिद्वयभानुभोगात्<br>षडर्तवः स्युः शिशिरो वसन्तः।<br>ग्रीष्मश्च वर्षाश्च शरच्च<br>तद्वद्धेमन्तनामा कथितोऽत्र षष्ठः॥'**

**वर्षायनर्तुयुग-पूर्वकमत्र सौरादिति च। अत एव मासलक्षणाद्रा-शिलक्षणं बलवत्, अतो राशिलक्षणमेवाङ्गीकृत्य ऋतूनां निर्धारणं करणीयम्।**

माघ और फाल्गुन शिशिर ऋतु है, चैत्र और वैशाख वसन्त ऋतु है, ज्येष्ठ और आषाढ ग्रीष्म ऋतु है, श्रावण और भाद्रपद वर्षा ऋतु है, आश्विन और कार्तिक शरद् ऋतु है, मार्गशीर्ष और पौष हेमन्त ऋतु है। सुश्रुत में भाद्रपद आदि महीनों द्वारा वर्षा आदि ऋतुयें कही गयी हैं। यह संशोधन के अनुसार विहित है। ज्योतिषशास्त्र के अनुसार विहित ऋतुओं का विभाजन सर्वोत्कृष्ट है। ज्योतिष में वसन्त ऋतु फाल्गुन और चैत्र माह नहीं है और न ही चैत्र और वैशाख माह है। किन्तु मीन और मेष वसन्त ऋतु है। जब फाल्गुन के आरम्भ में मीनसङ्क्रान्ति होती है तब फाल्गुन और चैत्र वसन्त ऋतु है। जब फाल्गुन के अन्त में मीनसङ्क्रान्ति होती है तब चैत्र और वैशाख वसन्त ऋतु है। इसी प्रकार वृष और मिथुन ग्रीष्म ऋतु है, कर्कट और सिंह वर्षा ऋतु है, कन्या और तुला शरद् ऋतु है, वृश्चिक और धनु हेमन्त ऋतु है, मकर और कुम्भ शिशिर ऋतु है। जैसा कि ज्योतिषशास्त्र में कहा गया है- 'मृग (मकर) आदि दो-दो राशि में सूर्य की संक्रान्ति से छः ऋतुयें होती हैं- शिशिर, वसन्त, ग्रीष्म, वर्षा, शरद् और हेमन्त नामक छः ऋतुयें कही गयी हैं।' वर्ष, अयन, ऋतु, युग पूर्वक यहाँ सौरादि चक्र है। इस तरह मासलक्षण से राशिलक्षण बलवान् है, अतः राशिलक्षण को अङ्गीकार करके ऋतुओं का निर्धारण करना चाहिये।

**उत्तरे देशे हिमवद्विन्ध्यसङ्कुले शीतमधिकम्भवत्यतस्तत्र हेमन्तशिशिरयोः गणना करणीया। दक्षिणदेशीयैर्वृष्टिसंबन्धिनोर्द्वयोः प्रावृड्वर्षाख्यत्वं कृत्वा पारिशेष्याच्छीतसम्बन्धिनोर्द्वयोः शरद्धेमन्ताख्यत्वं कृतम्। उत्तरदेशीयैस्तु शीतसम्बन्धिनोर्द्वयोर्हेमन्तशिशिराख्यत्वं कृत्वा, पारिशेष्याद्वृष्टिसम्बन्धिनोर्द्वयोर्वर्षाशरत्संज्ञत्वं कृतमित्यर्थः।**

देश के उत्तर भाग में हिमालय और विन्ध्य सङ्कुल में शीत अधिक होती है अतः वहाँ हेमन्त और शिशिर की गणना करनी चाहिये। देश के दक्षिण भाग में वर्षा का संबन्ध अधिक होने से प्रावृड् और वर्षा नामक ऋतुयें मानकर शेष शीत सम्बन्ध वाली ऋतुयें शरद् और हेमन्त कही गयी हैं। देश के उत्तर भाग में शीत का सम्बन्ध अधिक होने से हेमन्त और शिशिर दो ऋतुयें शीत की मानकर वर्षा के सम्बन्ध वाली वर्षा और शरद् नामक ऋतुयें होती हैं।

**वर्षाकालो हि विसर्गात्मको भवति, यतोहि बलं विसृजत्ययम्। अत्र सौम्यत्वात् सोमो बलवान् भवति रविस्तु हीयते। कालेऽस्मिन् शीतैःमेघ-वृष्ट्यनिलैः महीतलः शान्ततापो भवति। अत एव वर्षाकाले स्निग्धाश्चेहाम्ललवणमधुरा रसाः सेवनीयाः। मेघाच्छन्ने दुर्दिनेऽथवा वियति अम्बुलम्बाम्बुदे त्वम्ललवणकटुरससंयुक्तानां स्नेहे तलितानां भर्जितानां वा 'चाट-पकौडी' इति ख्यातानां विशिष्टानां पक्वान्नानां व्यञ्जनानाञ्च प्रयोगो हितावहो भवति।**

वर्षाकाल विसर्गात्मक होता है, क्योंकि यह बल का सृजन करता है। इसके सौम्य होने से सोम बलवान् होता है, सूर्य का बल हीनता को प्राप्त होता है। इस काल में शीत, मेघ, वर्षा और वायु से पृथ्वी के तल का ताप शान्त हो जाता है। अतः वर्षाकाल में स्निग्ध, अम्ल, लवण, मधुर रसों का सेवन करना चाहिये। मेघाच्छादित दुर्दिन में अथवा आकाश के अधिक जल वाले बादलों से युक्त होने पर अम्ल, लवण, कटु रस संयुक्त स्नेह में तले हुए अथवा भर्जित 'चाट-पकौडी' इस नाम से विख्यात विशिष्ट पक्वान्न और व्यञ्जनों का प्रयोग हितावह होता है।

**आदानमुक्तम्, तेनादानाख्येन कालेन ग्लानं-सक्लमं, वपुः-शरीरं, येषां पुरुषाणां ते आदाने ग्लानवपुषाञ्जनानामपचितधातूनामग्निरप्यपचितः सन्नो-मन्दः सन्, पुनर्वर्षासु सीदति ( हानिं याति ) अत एवाग्निवर्धकानां द्रव्याणामौषधीनां वा प्रयोगो वैद्यपरामर्शेन करणीयः।**

आदानकाल से जिन पुरुषों का शरीर ग्लानियुक्त, क्लमयुक्त हो जाता है, उन ग्लानियुक्त शरीर वाले व्यक्तियों में अपचित धातुओं के कारण आदानकाल में अग्नि भी अपचित अर्थात् मन्द हो जाती है, पुनः वर्षा में अग्नि और भी अधिक मन्द हो जाती है। अतः अग्निवर्धक द्रव्यों या औषधियों का प्रयोग वैद्य के परामर्श से करना चाहिये।

**ये हि वातदोषेण पीडिताः सन्ति तेषाङ्कृते निरूहबस्तिप्रयोगः समुचितः, स तु निष्णातेन चिकित्सकेनैव सम्पादनीयः। आस्थापनं-निरूहं, भजेत्। वर्षाकाले पुराणयवगोधूमादिकानामेव सेवनङ्करणीयम्। ये हि मांसभोजिनः सन्ति तैस्तूष्णस्पर्शात्मकानां मांसरसानां सेवनं करणीयं ये तु शाकाहारिणः सन्ति तैस्तु यूषाणां शाकमुद्गदाडिमादिकृतानां सेवनं करणीयम्। मांसरसेषु यूषेषु तु स्नेहशुण्ठीमरिचत्वगेलादी-नामवचूर्णनङ्करणीयम्॥ सौवर्चलाढ्यं दधिमस्तु-सेवनमपि समुचितम्। सर्वेष्वेतेषु मांसरसादिषु पिप्पलीपिप्पलीमूलचव्यचित्रकनागरात्मकस्य पञ्चकोलचूर्णस्यावचूर्णनमपि करणीयं मात्रया॥ दिव्यं आकाशजं तथा शृतं-क्वथितं चाम्भः पिबेत्। ततश्च क्लेदसंरक्षणार्थं वर्षाकाले क्षौद्रस्य प्रयोगो विशेषेण करणीयः।**

जो व्यक्ति वातदोष से पीडित होते हैं उनके लिए निरूहबस्ति का प्रयोग समुचित है, निष्णात चिकित्सक द्वारा ही आस्थापन अर्थात् निरूह बस्ति का प्रयोग करना चाहिये। वर्षाकाल में पुराण यव, गोधूम आदि का ही सेवन करना चाहिये। जो व्यक्ति मांसभोजी हैं, उन्हें उष्ण स्पर्श वाले मांसरसों का सेवन करना चाहिये। जो शाकाहारी हैं, उनको शाक, मुद्ग, दाडिम आदि द्वारा बनाये गये यूषों का सेवन करना चाहिये। मांसरसों और यूषों में स्नेह, शुण्ठी, मरिच, दालचीनी, इलायची आदि का अवचूर्णन करना (बुरकना) चाहिये। पर्याप्त सौवर्चल लवण मिलाये गये दधिमस्तु का सेवन भी समुचित है। इन सभी मांसरस आदि में पिप्पली, पिप्पलीमूल, चव्य, चित्रक, नागर से निर्मित पञ्चकोलचूर्ण का अवचूर्णन भी मात्रापूर्वक करना चाहिये। दिव्य आकाशीय जल तथा क्वथित जल पीना चाहिये। इसके पश्चात् क्लेद से संरक्षण के लिए वर्षाकाल में क्षौद्र का प्रयोग विशेष रूप से करना चाहिये।

**कालेऽस्मिन् नदीजलोदमन्थाहःस्वप्नाया-सातपांस्त्यजेत्। निश्चितरूपेण नदीजलादीन् पञ्च त्यजेत्। उदकालोडिताः सक्तवः ससर्पिष्का उदमन्थवाच्या जलावक्षीरीसंज्ञाः भवन्ति, तांस्त्यजेत्। आचार्यचरकः कथयति यत्-**

**'उदमन्थं दिवास्वप्नमवश्यायं नदीजलम्।**
**व्यायाममातपं चैव व्यवायं चात्र वर्जयेत्' इति।**
**(च. सू.अ. 6।34)**

**कालेऽस्मिन् ये ह्युदररोगिणः सन्ति तैस्तु धान्यपञ्चकक्काथस्य प्रयोगो श्रेष्ठो भवति। धान्यपञ्चकक्काथे तु धान्यकं नागरं मुस्तं बालकं बिल्वमेव च। एतानि पञ्चैव द्रव्याणि भवन्ति। एनं क्वाथं विंशतिग्रामपरिमितं ग्रहीत्वा 400मिली जले समुत्क्वाथ्य पादावशेषं कृत्वा द्विकालं भजेत्।**

इस समय नदीजल, उदमन्थ, दिवास्वप्न, आयास (श्रम), आतपसेवन आदि का त्याग करना चाहिये। निश्चितरूप से इन नदीजल आदि पाँचों का त्याग करना चाहिये। जल से आलोडित सक्तु, घी मिलाये गये उदमन्थ जिन्हें जलावक्षीरी कहते हैं, उनका त्याग करना चाहिये। आचार्य चरक कहते हैं कि उदमन्थ, दिवास्वप्न, अवश्याय (ओस), नदीजल, व्यायाम, आतपसेवन और व्यवाय इस समय वर्जित हैं। इस समय जो उदररोगी हैं उनके लिए धान्यपञ्चक क्वाथ का प्रयोग श्रेष्ठ होता है। धान्यपञ्चक क्वाथ में धनियां, सोंठ, नागरमोथा, सुगन्धबाला, और बिल्व ये पाँच द्रव्य होते हैं। यह क्वाथ 20 ग्राम की मात्रा में लेकर 400 मिलीलीटर जल में क्वाथ करके चौथाई भाग शेष रहने पर दोनों समय पीना चाहिये।

---

## उत्तराणि ( पदप्रहेलिका - 1 )

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| 1 भा | 2 र | 3 ती | | 4 वै | 5 त | र | णी | |
| | 6 स | र | सि | ज | म् | | | 7 अ |
| 8 दै | व | म् | | य | | 9 वा | 10 स | व |
| | ती | | 11 कु | न्ती | | 12 स | ह | सा |
| 13 या | | 14 अ | म्भः | | 15 वि | | | न |
| 16 च | र | म | | 17 अ | ना | 18 म | 19 य | म् |
| कः | | 20 रा | 21 ज | न्यः | | 22 न | तिः | |
| | 23 अ | व | निः | | | सि | | 24 का |
| 25 ज | ग | ती | | | 26 रा | ज | द | न्तः |

प्रेषण-प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८-५७

डाक पंजीयन
Jaipur City/405/2021-23

हार्दिक शुभकामनों सहित :-

निर्माता

# ए इन्फ्रास्ट्रक्चर लिमिटेड

## एस्बेस्टोस सीमेन्ट पाइप्स

सस्ता, मजबूत एवं टिकाऊ

सर्वोत्तम 'माजा' तकनीक द्वारा निर्मित पेयजल, कृषि, बोरवैल, सीवरेज
एवं ड्रेनेज में उपयोगी तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ

एवं

निर्माता

## एस्बेस्टोस सीमेन्ट शीट्स

छत एक, लाभ अनेक

उच्च गुणवत्ता की फाइबर सीमेन्ट की नालीदार चादरें

कारखाना : हमीरगढ़ - 311025, जिला भीलवाड़ा (राजस्थान) दूरभाष: 01482-286102-07
दिल्ली कार्यालय : ए-९ए, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26961849 / 26965673
जयपुर कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड, जयपुर-302001 फोन: 0141-4019691 / 2370566
ईमेल आईडी : jaipur@kanoria.org (Pipe Dn.), sharma.ashok@kanoria.org (Sheet Dn.)

## राष्ट्रीय विचारों के लिए पढ़ें

बात भारत की
पाञ्चजन्य
साप्ताहिक

Voice of the Nation
ORGANISER
Weekly



हमारी विशेषताएं
- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में उपलब्ध
- ई-पेपर की सुविधा



You can subscribe पाञ्चजन्य / ORGANISER weeklies online through our
Website : panchjanya.com, organiser.org

| वार्षिक ग्राहक शुल्क | पाञ्चजन्य ₹1000 (साधारण डाक द्वारा) | ORGANISER ₹1000 (by ordinary post) | विदेशों में $80 (विदेशों में हवाई डाक द्वारा) |
|---|---|---|---|

*रजिस्टर्ड डाक के लिए 1000 रुपए अतिरिक्त शुल्क

### भारत प्रकाशन (दिल्ली) लिमिटेड

द एडुस, प्लॉट नं. 4बी, डिस्ट्रिक्ट सेन्टर, मयूर विहार फेज-1 एक्सटेंशन, दिल्ली-110091 • ई-मेल : advt@bpdl.in

विज्ञापन विभाग सम्पर्क सूत्र : [illegible]

स्वत्वाधिकारी-भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम्
अध्यक्षः शंकरप्रसादशुक्लः प्रकाशको मुद्रकश्च माणकचन्द
माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम्
दूरभाषः २३६५७२१ पत्रसंकेतः- भारतीभवनम्, बी-15,
न्यू कॉलोनी, जयपुरम्-३०२००१ • दूरभाषः ०१४१-२३७१०१४

प्रतिष्ठायाम्,